दुर्लभ बौद्ध ग्रन्थ शोध पत्रिका

A Review of rare buddhist texts

10

दुर्लभ बौद्ध ग्रन्थ शोध योजना

केन्द्रीय उच्च तिब्बती शिक्षा संस्थान

सारनाथ, वाराणसी

1990

ह्रीः

दुर्लभ बौद्ध ग्रन्थ शोध पत्रिका

10

सम्पादक

प्रो० एस. रिनपोछे
योजना निदेशक

प्रो० ब्रजवल्लभ द्विवेदी
उपनिदेशक

दुर्लभ बौद्ध ग्रन्थ शोध योजना
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

बुद्धाब्द २५३४ | कार्तिक पूर्णिमा | ख्रीस्ताब्द १९९०

सहायक मण्डल

पं० जनार्दन पाण्डेय — डॉ० ठाकुरसेन नेगी

डॉ० बनारसीलाल — ठिनलेराम शाशनी

डॉ० टशी सम्फेल — पेन्पा दोर्जे

विजयराज वज्राचार्य

प्रथम संस्करण : ५५० प्रतियाँ

मूल्य : रु० ५५.००

प्रकाशक :
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

मुद्रक : रत्ना प्रिंटिंग वर्क्स, कमच्छा, वाराणसी

Dhīḥ

A Review of rare buddhist texts

10

Editor

PROF. SAMDHONG RINPOCHE
Project Director

PROF. VRAJVALLABH DWIVEDI
Deputy Director

भोटविद्या संस्थानम्

RARE BUDDHIST TEXT RESEARCH PROJECT

Central Institute of Higher Tibetan Studies

SARNATH, VARANASI

B. E. 2534 KĀRTIKA PŪRṆIMĀ C. E. 1990

Co-Editors

Pt. Janardan Pandey
Dr. Banarsi Lal
Dr. Tashi Samphel
Dr. Thakur Sain Negi
Thinlay Ram Shashni
Penpa Dorjee
Vijay Raj Vajracharya

First Edition : 550 Copies

Price : Rs. 55.00

Published by :
Central Institute of Higher Tibetan Studies
Sarnath, Varanasi

Printed by :
Ratna Printing Works, Kamaccha, Varanasi.

धीः

विषयानुक्रमणी

विनिष्टेन्द्रियवर्गो नष्टविकल्पोऽसमाप्तभवबीजः ।
आनन्दभासयाऽसौ गमनसमोऽप्यहह शीतलः स्वादुः ॥
—योगिनी चिन्ता

श्रीमन्महाबोधिवन्दनाष्टकम्

[ये दोनों स्तोत्र—महाबोधिवन्दनाष्टक और आदिबुद्धस्तोत्र—श्री जगन्नाथ उपाध्याय जी के व्यक्तिगत संग्रह से प्राप्त अप्रकाशित स्तोत्रसंग्रह से लिये गये हैं। इनका पत्राङ्क 7,10 तथा स्तोत्राङ्क 22,28 है।]

ॐ नमो बुद्धाय

सौवर्णवर्णं कलविङ्कघोषं ब्रह्मस्वरं कारुणिकं सुसेव्यम्।
नरोत्तमं शीलविशुद्धदेहं श्रीमन्महाबोधिमहं नमामि ॥ 1 ॥

शाक्येन्द्रवंशोद्भवदिव्यदेहं तृष्णाच्छिदं मारभिदं जिनेशम्।
ज्ञानास्पदं क्लेशभिदं विनेशं श्रीमन्महाबोधिमहं नमामि ॥ 2 ॥

समन्तभद्रं वरलक्षणाङ्गं सत्त्वार्थसिद्धिं सुकृतैः प्रणम्यम्।
श्रेयस्करं सत्त्वहितैकचित्तं श्रीमन्महाबोधिमहं नमामि ॥ 3 ॥

धर्मोदकं यः कृपयोत्ससर्ज रागाग्निसन्दीपितपुद्गलानाम्।
सुखाय संबोधिपयोमुचं तं श्रीमन्महाबोधिमहं नमामि ॥ 4 ॥

भवाब्धिनिस्तारणसेतुभूतं तथागतं तत्त्वविदं नृसिंहम्।
त्रैलोक्यनाथं वरबोधिरत्नं श्रीमन्महाबोधिमहं नमामि ॥ 5 ॥

पदार्थसम्पादनसुव्रतस्थं मायासुतं मारभिदं जितारिम्।
शास्तारमग्रं वरबोधिसत्त्वं श्रीमन्महाबोधिमहं नमामि ॥ 6 ॥

लोकेशनाथं हरिनाथनाथं भूतेशनाथं सुरनाथनाथम्।
कृतान्तनाथं नरनाथनाथं श्रीमन्महाबोधिमहं नमामि ॥ 7 ॥

स बुद्धरूपः स हि धर्मरूपः स एव संघोऽपि विनेयकानाम्।
अभूच्छरण्यः शरणागतानां श्रीमन्महाबोधिमहं नमामि ॥ 8 ॥

॥ इति श्रीमन्महाबोधिवन्दनाष्टकं समाप्तम् ॥

मञ्जुश्रीकृतमादिबुद्धस्तोत्रम्

श्रीस्वयंभुवे नमः

नमस्ते बुद्धरूपाय धर्मरूपाय ते नमः ।
नमस्ते संघरूपाय पञ्चबुद्धात्मने नमः ॥ 1 ॥

पृथ्वीरूपायाब्रूपाय तेजोरूपाय ते नमः ।
नमस्ते वायुरूपायाकाशरूपाय ते नमः ॥ 2 ॥

ब्रह्मणे सत्त्वरूपाय रजोरूपाय विष्णवे ।
तमोरूपमहेशाय ज्ञानरूपाय ते नमः ॥ 3 ॥

प्रज्ञोपायात्मरूपाय गुह्यरूपाय ते नमः ।
दिग्रूपलोकपालाय विश्वरूपाय ते नमः ॥ 4 ॥

चक्षूरूपाय कर्णाय घ्राणरूपाय जिह्वके ।
कायरूपाय श्रीधर्मरूपाय मनसे नमः ॥ 5 ॥

नमस्ते रूपरूपाय शब्दरूपाय ते नमः ।
रसगन्धस्वरूपाय स्पर्शरूपाय ते नमः ॥ 6 ॥

धर्मरूपधारकाय षडिन्द्रियात्मने नमः ।
मांसास्थिमेदोमज्जानां संघातरूपिणे नमः ॥ 7 ॥

रूपाय जगतानां ते स्थावराणां च मूर्तये ।
तिरश्चां मोहरूपाय रूपायाश्चर्यमूर्तये ॥ 8 ॥

जन्मरूपसृष्टिकर्त्रे कालरूपाय मृत्यवे ।
भव्याय वृद्धरूपाय बालाय ते नमो नमः ॥ 9 ॥

प्राणापानसमानोदानव्यानमूर्तये नमः ।
वर्णाय वर्णरूपाय भोक्त्रे स्वमूर्तये नमः ॥ 10 ॥

दिनरूपाय सूर्याय चन्द्राय रात्रिमूर्तये ।
तिथिरूपाय नक्षत्रयोगवारादिमूर्तये ॥ 11 ॥

बाह्याभ्यन्तररूपाय लौकिकाय नमो नमः ।
नैर्वाणाय नमस्तुभ्यं बहुरूपाय ते नमः ॥ 12 ॥

आदिबुद्धद्वादशकं पुण्यं प्रातः पठिष्यति ।
यदिच्छेत् तल्लभेन्नूनं मनुजो नित्यनिश्चयः ॥ 13 ॥

॥ इति आदिबुद्धद्वादशकं समाप्तम् ॥

दुर्लभ ग्रन्थ परिचय

—जनार्दन पाण्डेय—

['धीः' के इस अङ्क में निम्नलिखित 7 ग्रन्थों का परिचय दिया जा रहा है—

1. मन्त्रसमुच्चय
2. धारणीसंग्रहपुराणमहायानसूत्रराज
3. संशयपरिच्छेद
4. अमनसिकारक्रम
5. डाकार्णव
6. अध्यात्मसारशतक—प्रभाकर गुप्त
7. स्वाधिष्ठानप्रभेद—आर्यदेव

इनमें महत्ता और पाठकों के लिये उपयोगिता की दृष्टि से अमनसिकारक्रम का जितना अंश उपलब्ध था वह और स्वाधिष्ठानक्रमप्रभेद सम्पूर्ण दे दिया गया है ।]

1. मन्त्रसमुच्चयः

ग्रन्थ—मन्त्रसमुच्चय
संख्या—MBB–1971–89
पत्रसंख्या—28, पंक्ति प्र० प० 12, अक्षर प्र० पं० 52
आधार—नेपाली कागज, **लिपि**—नेवारी, **अपूर्ण** ।

प्रारम्भ

········नमस्त्रैयध्विकानां सर्वतथागतानाम् ॐ शुभविवरणवरदः चुरु2 मुलु2 सर्वतथागतधातुधर पद्मगर्भ परक्षेत्रस्वा····तथागतधर्मचक्रप्रवर्तन वज्रबोधिमन्त्रपः अलंकारः अलंकृतः सर्वतथागताधिष्ठितः बोधय2 बाधनि2····स्वस्ति भवन्तु सर्वावरणानि सर्वपापविगतः हुरु2 सर्वस्वकविगतः सर्वतथागत-हृदयवक्त्रिणि सम्भव2 तथागतगुह्यधातु····बुद्ध2 सुबुद्ध2 सर्वतथागत अधिष्ठित धातुगर्भ स्वाहा, ॐ सर्वतथागत अधिष्ठित स्वाहा सर्वतथागत हृदयधातु मुद्ध स्वाहा ।····यतिस्थित वक्रतथागताधिष्ठित स्वाहा हूं हूं फट् स्वाहा। सर्वतथागत उष्णीषधातुमुद्गीती सर्वतथागतधर्मधातुविभूषित अमृत2 हूँ2 स्वाहा ।

अन्त

ॐ नमो भगवते अतिबलमहारत्नपर्यङ्कानुरागाय तथागताय अर्हते सम्यक्संबुद्धाय प्रतिघात-सहाय पाशाङ्कुशलयाय पञ्चमहापापमोचन जहि। ॐनमो भगवते रत्नशरणधर्मपाणये तथागतायार्हते सम्यक्संबुद्धाय। थगुवासायापुण्यानेकप्रकारथगुवाताय....काय....सुश्रु....नमो भगवते प्रवरास्थिचय-हृसद्विनयसत्त्वसहस्रपारमितायार्हते सम्यक् सुश्रद्धाय थगु वातायाय नमः॥

पुष्पिका

नहीं है।

विवरण

इस ग्रन्थ की माइक्रोफिश प्लेट एडवांस स्टडी आफ वर्ल्ड रिलीजन्स, न्यूयार्क से शान्तरक्षित ग्रन्थालय में प्राप्त हुई है, जिसके आधार पर यह विवरण दिया गया है।

यह मन्त्रों का संग्रहमात्र है, जिसमें पत्र 1 से 19 तक 67 मन्त्र और 19 से 24 तक 51 मन्त्रों में मन्त्रसंख्या क्रम से दी गई है। 24 से 28 तक विना संख्या के 27 मन्त्र हैं। [कुल 145 मन्त्रों का संग्रह है। ये मन्त्र कहाँ से लिये गये हैं, कौन किस देवता का मन्त्र है और उसका विनियोग कहाँ कैसे होगा, ऐसा कोई संकेत नहीं है। ऐसा प्रतीत होता है कि किसी विद्वान् ने अपनी स्मृति के लिये इनका संकलन किया है, इसलिये किसी प्रकरण या पुष्पिका का प्रश्न ही नहीं उठता। पत्र 3-4 और 28 से आगे नहीं हैं। पत्र 25 में "पञ्चविंशति वैरोचन या हृदय", "श्रीचक्रसंवर या हृदय", पत्र 27 में "शतसाहस्रिका प्रज्ञापारमिताधारणी समाप्त", पत्र 28 में "अष्टसाहस्रिकानाम हृदय समाप्त" तथा "प्रज्ञापारमिता हृदयधारणी समाप्त" ये वाक्य उन मन्त्रों के अन्त में लिखे हैं। केवल मन्त्र-ज्ञान के लिये ग्रन्थ उपयोगी है। बीच-बीच में मन्त्र-संगति बैठाने के लिये 'थगु' 'या' आदि नेवारी भाषा के शब्दों का भी प्रयोग किया है।

2. धारणीसंग्रहपुराणमहायानसूत्रराजः

ग्रन्थ—धारणीसंग्रह पुराणमहायानसूत्रराज

संख्या—MBB—II—171

पत्रसंख्या—1-282, **पंक्ति प्र० प०** 10, **अक्षर प्र० पं०** 44

आधार—नेपाली कागज, **लिपि**—नेवारी, **पूर्ण**।

प्रारम्भ

ॐ नमः श्रीवज्रसत्त्वाय । नमः श्रीरत्नगर्भाय ।
विहरति कनकाद्रौ शाक्यसिंहो मुनीन्द्रः
परिमितसुरसंघैः सेव्यमानो जनौघैः ।
कुवलयदलनेत्रो लक्षणैर्युक्तगात्रः
.........................सर्वलोके हितज्ञः ॥

ये देवाः सन्ति मेरौ वरकनकमये मण्डले ये च यक्षाः
पाताले ये भुजङ्गाः फणिमणिकिरणा ध्वस्तमोहान्धकाराः ।
कैलास्ये(से) श्रीविलास्ये(से) प्रमुदितहृदया ये च विद्याधरेन्द्रा-
स्ते मोक्षद्वारभूतं मुनिवरवचनं श्रोतुमायान्ति सर्वे ॥

अन्त

इदमवोचद् भगवानात्तमनास्ते च भिक्षवस्ते च बोधिसत्त्वाः सा च सर्वावती पर्षत् सदेव-मानुषासुरगरुडगन्धर्वाश्च लोका भगवतो भाषितमभ्यनन्दन्निति ।

पुष्पिका

इति श्री आर्यश्रीधारणीसंग्रहः पुराणमहायानसूत्रं रत्नचाक्रं परिसमाप्तः ।

विवरण

इस ग्रन्थ की माइक्रोफिश प्लेट एडवांस स्टडी आफ वर्ल्ड रिलीजन्स, न्यूयार्क से शान्तरक्षित ग्रन्थालय में प्राप्त हुई है, जिसके आधार पर यह विवरण दिया गया है।

इसमें प्रायः 108 धारणियों का संग्रह है। प्रत्येक धारणी की अवान्तर पुष्पिका भिन्न है। 'धीः' के द्वितीय अंक में जिन धारणियों का परिचय दिया जा चुका है, उनमें निम्नांकित 36 धारणियाँ नहीं हैं, जो इस ग्रन्थ में उपलब्ध हैं। शेष सभी उसमें आ चुकी हैं।

1. श्री योगाम्बरनाम धारणी
2. ,, चक्रसंवरनाम धारणी
3. ,, अपरिमितानाम धा०
4. ,, पर्णशबरीतारानाम धा०
5. ,, प्रतिसरायां विद्याधरनाम धा०
6. ,, सिंहनादलोकेश्वरनाम धा०
7. ,, अमोघपाशलोकेश्वरनाम धा०
8. ,, विजयवाहिनीनाम धा०
9. ,, अष्टमातृकानाम धा०
10. ,, शनिश्चरस्तवनाम धा०
11. श्री वसुन्धराया नन्दिमुखनाम धा०
12. ,, धर्मधातुवागीश्वरनाम धा०
13. ,, लोकेश्वरशतनामस्तोत्रनाम धा०
14. ,, खसर्पणानाम धा०
15. ,, दानपारमितानाम धा०
16. ,, शीलपारमितानाम धा०
17. ,, शान्तिपारमितानाम धा०
18. ,, वीर्यपारमितानाम धा०
19. ,, ध्यानपारमितानाम धा०
20. ,, प्रज्ञापारमितानाम धा०

21. षट्पारमितानाम धारिणी
22. आर्यषण्मुखनाम धा०
23. आर्यसत्याक्षरनाम धा०
24. लोकातीतस्तवनाम धा०
25. सुवर्णप्रभानाम धा०
26. वज्रवैरोचनीदेवी नाम धा०
27. विघ्नेश्वरनाम धा०
28. दशभूमीश्वरनाम धा०
29. ललितविस्तरनाम धारिणी
30. सपनेयविद्यानाम धा०
31. आर्यमेघसूत्रनाम धा०
32. चतुर्भुजमहाकालनाम धा०
33. षड्भुजमहाकालनाम धा०
34. षोडशभुजमहाकालनाम धा०
35. भृकुटीतारानाम धा०
36. गणेशषोडशनाम धारिणी

3. संशयपरिच्छेदः

ग्रन्थ—संशयपरिच्छेद

संख्या—3 363

पत्रसंख्या—36 (गणनया), **पंक्ति प्र० प०** 6 (प्रायः) **अक्षर प्र० पं०** 52

आधार—ताडपत्र, **लिपि**—प्राचीन नेवारी, **अपूर्ण** ।

प्रारम्भ (उपलब्ध पत्र से)

एवं मत्वा कल्याणमित्रविरहात् स्वचित्तस्य यथाभूतपरिज्ञानमनधिगम्य अहङ्कारममकारेण रिक्तं तुच्छं शून्यं शुभाशुभाधिकं कल्पेऽपि वाऽनादिसंसारे दुःखमनुभवन्ति । यथोक्तं भगवताऽऽर्याष्ट-साहस्रिकायां प्रज्ञापारमितायां कल्याणमित्रपरिवर्ते—"सुभूतिराह—यदि भगवन् सर्वधर्मा विविक्ताः, सर्वधर्माः शून्याः कथं भगवन् सर्वसत्त्वानां संक्लेशं प्रजायते, कथं भगवन् सर्वसत्त्वानां व्यवदानं प्रजायते, न च भगवन् सर्वसत्त्वानां विविक्तं संक्लिश्यते, न च भगवन् विविक्तं व्यवदायते, न च भगवन् शून्यं संक्लिश्यते । न च भगवन् शून्यं व्यवदायते । न च शून्यं वा विविक्तं वा, शून्यं वाऽनुत्तराम''''वापि गतिमदुच्यते'''"

अन्त

वज्रगुरुराह—

नापनेयमतः किञ्चित् प्रक्षेप्तव्यं न किञ्चन ।
द्रष्टव्यं तु ततो भूतं भूतदर्शी विमुच्यते ॥ इति ।

निष्पन्नक्रमस्यैतदधिवचनं यदुत भूतदर्शनमिति, भूतदर्शनाच्छाश्वतोच्छेदसंक्रान्तादिदृष्टयो निरुद्धयन्ति, तथापि व्यवहारमाश्रित्य संक्रान्तिविशुद्धिं नि''''

पुष्पिका

नहीं है।

विवरण

इस ग्रन्थ की माइक्रोफिल्म राष्ट्रीय अभिलेखागार, काठमाण्डू से शान्तरक्षित ग्रन्थालय में आई है, जिसके आधार पर यह विवरण दिया जा रहा है।

यह अत्यन्त महत्त्वपूर्ण और उपयोगी ग्रन्थ प्रतीत होता है। इसमें वज्रशिष्य और वज्रगुरु के प्रश्नोत्तर के रूप में बौद्ध धर्म, दर्शन और साधना से सम्बद्ध सम्पूर्ण संशयों का उच्छेदन किया गया है। छोटे-छोटे व्यावहारिक विषयों से लेकर बड़े-बड़े गूढ़ रहस्यों तक की शंकाओं का समाधान है। दुर्भाग्य से ग्रन्थ अपूर्ण है। पंचम परिच्छेद के कुछ अंश से ग्यारहवें परिच्छेद के कुछ अंश तक ही उपलब्ध है। पूर्ण ग्रन्थ के कहीं होने की सूचना अभी तक किसी ग्रन्थसूची से हमें नहीं प्राप्त हुई। पञ्चम से दशम परिच्छेद तक की अवान्तर पुष्पिकाएँ इस प्रकार हैं—

कर्मान्तविभागमेलावणसंशयपरिच्छेदः पञ्चमः।

संवृतिसत्यमेलावणसंशयपरिच्छेदः षष्ठः।

परमार्थसत्यमेलावणसंशयपरिच्छेदः सप्तमः।

अप्रतिष्ठितनिर्वाणधातुमेलावणपरिच्छेदोऽष्टमः।

श्रीसर्वबुद्धसमायोगडाकिनीजालसंवरन्यायेन बोधिसत्त्वचरितधर्मोदयाभिसम्बोधि-प्रपञ्चतामेलावणपरिच्छेदो नवमः।

निष्प्रपञ्चतया मेलावणपरिच्छेदो दशमः।

इस प्रकार इस उपलब्ध अंश में कर्मान्तविभाग, संवृतिसत्य, परमार्थसत्य, अप्रतिष्ठितनिर्वाण-धातु, धर्मोदयाभिसम्बोधि और निष्प्रपञ्चता विषयक ही प्रश्नोत्तर हैं। ग्रन्थ की प्रश्नोत्तरशैली बड़ी रोचक है। शिष्य लम्बे-लम्बे प्रश्न करता है और गुरु अत्यन्त संक्षेप में सम्पूर्ण प्रश्न का समाधान कर देते हैं। उदाहरण के लिये षष्ठ परिच्छेद का प्रथम प्रश्न और उसका उत्तर इस प्रकार है—

वज्रशिष्य उवाच—युष्मत्पादप्रसादादनन्तरोक्तप्रवचनानुसारेण कायवाक्चित्तस्य स्वलक्षणे प्रविचार्यमाणे यदवधीरितं समाप्त्यनन्तरं तद्भट्टारकपादौ निवेद्योत्तरं समाधिविशेषं परिपृच्छामि उत्पत्तिक्रमादारभ्य कायविवेकस्य पर्यन्तं त्रिवज्रविनाभावलक्षणा विमुक्तिमात्रतः कायविवेकदेवतारूपं न विद्यते, परमाणुसमूहत्वात् कायस्य। वाग्विवेकस्यापि पर्यन्तं प्रवेशादिक्रमेण वज्रजपमात्रापरिज्ञानं तत्रापि देवताकारो न विद्यते, प्रति···पमस्वभावत्वाच्छब्दस्य। चित्तविवेकस्यापि पर्यन्तं प्रकृत्याभास-परिज्ञानमात्रम्। तत्रापि सर्वाकारवरोपेतादिलक्षणान्वितदेवतास्वरूपं नोपलभ्यते, आभासमात्रत्वा-च्चित्तस्य। अनेन द्योत्येन संवृतिसत्यमाश्रित्ये(ते)न विना प्रतिष्ठानं लभते। तस्माज्ज्ञानमात्रेण देवता-निष्पत्तिं गुरुप्रसादादवगन्तुमिच्छामि।

वज्रगुरुराह—साधु साधु महासत्त्व ! अचिन्त्यं तु देवतातत्त्वं सर्वबुद्धोपदेशं गुरुपर्वक्रमागतं दशभूमीश्वराणामप्यगोचरं ते प्रतिपादयिष्यामि । स्वचित्तस्य यथाभूतपरिज्ञानं मनोगे स्कन्धे वाऽन्वायतनादीनामभावे तु त्रयप्रकृत्याभासमात्रेण सर्वलक्षणोपेतदेवतारूपग्रहणम् । तच्च स्वप्नमायादिद्वादशदृष्टान्तैरुपलक्षितमयं बुद्धानाममनोमयकायः ।

ग्रन्थ का जितना अंश उपलब्ध है, उसमें प्रायः गुह्यसिद्धि और गुह्यसमाज के वचन उद्धृत हैं और वैरोचनाभिसम्बोधितन्त्र, समाधिराजसूत्र, मूलसूत्र, परमाद्यमहायोगतन्त्र, डाकिनीजालसंवर तथा कम्बलाचार्यपाद के वचन भी प्रमाणरूप में दिये गये हैं। ग्रन्थ अत्यन्त उपयोगी है।

4. अमनसिकारक्रमः

ग्रन्थ—अमनसिकारक्रम

संख्या—MBB—II—144

पत्रसंख्या— 5, **पंक्ति प्र० प०** 12, **अक्षर प्र० पं०** 54

आधार—ताड़पत्र, **लिपि**—नेवारी (प्राचीन), **पूर्ण** ।

विवरण

यह ग्रन्थ एडवांस स्टडीज आफ वर्ल्ड रिलीजन्स, न्यूयार्क से माइक्रोफिश प्लेट के रूप में शान्तरक्षित ग्रन्थालय में आया है। उसी के आधार पर यह विवरण दिया जा रहा है। इसमें—

इति बुद्धबोधिसत्त्वसिद्धानामाम्नायः ।

अमनसिकारयथाश्रुतक्रमः समाप्तः ।

सम्प्रदायविधिः ।

भगवतीसंहार्येत्याम्नायः ।

ये चार अवान्तर पुष्पिकाएँ हैं। इसके प्रत्येक प्रकरण में जो सिद्धपराम्पराक्रम दिया है और नागार्जुन एवं अद्वयवज्र के संबन्ध में जो विवरण दिया है, वह अनुसन्धित्सुओं के लिये उपयोगी हो सकता है, इसलिये इस लघु ग्रन्थ से केवल प्रारम्भ और अन्त की सामग्री न देकर ग्रन्थ का उपलब्ध पूरा अंश ही हम यहाँ दे रहे हैं। न्यू कैटलागस् कैटलागरम् भाग 1, पृष्ठ 316 में सूचित किया गया है कि 'अमनसिकाराम्नाय' नाम से इस ग्रन्थ को प्रो० जी० टुची ने 1930 ई० में जर्नल आफ एशियाटिक सोसाइटी आफ बंगाल के पेज नं० 148-155 में प्रकाशित किया है।

नमो मञ्जुवज्राय ।

मञ्जुवज्रं प्रणम्यादौ नाथपादमनन्तरम् ।
अमनसिकाराम्नायं वक्ष्यते सुमहोदयम् ॥

संबुद्धा बोधिसत्त्वाश्च सिद्धास्तैरनुशासिताः ।
अभिषिक्तास्तथेत्येषामाम्नायक्रम इष्यते ॥

तत्रादौ धर्मचक्रेऽस्मिन् श्रावकैः परिवारितः ।
उपतस्थे स भगवान् दिशन् पारमितादिकम् ॥

ततस्तान् स परित्यज्य गतवान् दक्षिणापथे ।
निर्माय धर्मधात्वाख्यं मण्डलं सुमनोरमम् ॥

नायकः स्वयमेवात्र बोधिसत्त्वाश्च षोडश ।
नायकाश्चाभवन्नष्टौ तथाष्टावुपनायकाः ॥

नामतश्च निगद्यन्ते क्रमतो मण्डलस्थिताः ।
मण्डलं तु गुरूद्दिष्टं नैतदाम्नायसंगतम् ॥

मैत्रेयः क्षितिगर्भश्च वज्रपाणिः खगर्भकः ।
लोकेश्वरश्च मञ्जुश्रीः सर्वनिर्वरणस्तथा ॥

समन्तभद्रश्चन्द्राभः सूर्याभोऽमलकीर्तिना ।
विमलप्रभस्तथा धर्मोद्गतो रत्नमतिस्तथा ॥

व्योमगञ्जश्च सुधनो मण्डलस्था यथाक्रमम् ।
अभिषेकं ततस्तेषां दत्त्वा पारमितादिकम् ॥

समर्प्य शाक्यसिंहेन व्याकृतः शासनेऽमुना ।
आर्यनागार्जुन इति भविष्यति महामतिः ॥

प्रकर्तव्यमनेनापि धर्मचक्रप्रवर्तनम् ।
दक्षिणापथदेशेऽस्मिन् पत्तने करहाटके ॥

ब्राह्मणस्य कुले जन्म पिता चास्य त्रिविक्रमः ।
माता सावितृ(त्री)नाम्न्यस्य व्याकृतादपरं मतम् ॥

दामोदरेति विख्यातो भिक्षुत्वे शाक्यमित्रकम् ।
नामापरं रत्नमतिरनुग्रहविधौ स्थितः ॥

आह्लाऽद्वयवज्रेति वज्रयोगिन्यधिष्ठितः ।
सरहः सिद्धिभाक् तेन तदनुग्राहको भवेत् ॥

अस्यैवानुग्रहात् पूर्वं तेन(ना)कारि च नाम तत् ।
ततः श्रुतं हयग्रीवं पश्चाच्च दर्शनम् ॥

रत्नमतिना च समं वरेन्द्रयां प्रस्थितः पुनः ।
लेखयित्वा प्रतिष्ठेदं बोधिसत्त्वस्य धीमतः ॥

पूजां प्रतिदिनं तस्य कृत्वा नागार्जुनोऽवसत् ।
ग्रामे देघ(व)पुराख्ये तु प्रक्रान्तः सुसमाहितः ॥

लोको नाम नटस्तस्य गौरी च सहचारिणी ।
तयोः पुत्रस्त्रिशरण आर्यमध्येस(ष)ते परम् ॥

रत्नमतिं दर्शयति स तमाह न पश्यसि ।
ज्ञानक्षणेन विकलः कथं त्वं पश्यसि क्षणात् ॥

तं प्रत्याह त्रिशरणस्त्वं मेऽनुग्रहं कुरु ।
यथा पश्यामि तं नाथं ज्ञानचक्षुरतीन्द्रियः ॥

आर्यनागार्जुनानुज्ञां प्राप्य सिद्धस्तदाभवत् ।
बोधिसत्त्वेन च ततोऽनुगृहीतो यथार्थतः ॥

मनोभङ्गचित्तविश्रान्ती चर्यास्थानं विवेचितम् ।
आकृतिं सव(शब)रस्यासौ दधन् हि वसति स्म सः ॥

॥ इति बुद्धबोधिसत्त्वसिद्धानामाम्नायः समाप्तः ॥

इन्द्रभूतिपा । उड्डिनी । वज्रयोगिनी । मिलापा । नारोपा । अद्वयवज्रपा । ध्यायीपा । महापण्डितामोघश्रीः । अथवा सव(शब)रनाथ । अद्वयवज्र । बज्रपाणि । पैण्डपातिक । पण्डिताभयाकरगुप्त । पुनरद्वयवज्रस्येति । वः करुणा उपायचक्रम् । जः शून्यता । तयोरेकं रेफः । वाक्पथातीतवाकारो राकाराकारवर्जितः । हेत्वनुपलब्धि हीकारो वाराही वज्रपूर्विका ॥ इति परमार्थविशुद्धिः । कायवाक्चित्तविशुद्धया त्रि(गु?)कोणं हेतुफलयोरभेदत्वात् त्रिकोणं तुल्यता धर्मोदयेति ॥

नमः श्रीवज्रयोगिन्यै । प्रथमं बाह्यपूजा सिन्दूरेण । असम्भवे मन्त्रेण । स्वहृदि सूर्यस्थहूंकाररश्मिभिराकृष्य प्रवेश्य पुष्पादिभिः संपूज्य तदनन्तरं जगच्छून्यीकृत्य शून्यतानन्तरं झटित्यात्मानं भगवतीं भावयेत् । पर्वतशिरोपरि नानापुष्पोपेतां सूर्यस्थहूँकाररश्मि संस्मार्य श्वासवातो यथा···· गः । अमृतास्वादनं वशीकरणे पर्वतादिकं पारदसदृशं भावयन् वामनासापुटेन पिबेत् । त्रिकालं वलिसाधना च कर्तव्या । यथाऽऽदित्यो बालतरुणाद्यनपेक्ष्य स्वकिरणैः पर्वतमाक्रामति तथा भगवतीपर्वताक्रान्तं भावयेत् । अमृतमास्वादयेत् । शिष्यानुग्रहे जिह्वायां मन्त्रमभिलिख्य स्वहृद्रश्मिनादं प्रवेश्य आवेशयेत् । वज्रयोगिनी गुरुपरम्परा । शबरनाथ, सागरदत्त, विजयमोघ, अनङ्गवज्र, वसो, पिण्डपातिक, पण्डितविनयगुप्त, महापण्डितवागीश्वर, अवधूतसुधनश्री, लीलावज्र, ललितवज्र, कोविदारपण्डितपादाः ।

नमः श्री स(श)बरेश्वराय। इह खलु मध्यदेशे पञ्चकपिलवस्तुमहानगरसमीपे झाडकरणी नाम पल्लिकाऽस्ति। तस्मिन् स्थाने ब्राह्मणजातिर्नानूको नाम ब्राह्मणी च सावित्री नाम प्रतिवसति स्म। तदा च कालान्तरेण दामोदरो नाम तत्पुत्रो बभूव। स चैकादशवर्षदेशीयः कुमारः सामार्द्धवेदको गृहान्निष्क्रम्य मर्तु(मृत्यु)बोधो नामैकदण्डोऽभूत्। ततः पश्चाल्लीकटीसत्त्रे पाणिनिव्याकरणं श्रुत्वा सप्तवर्षपर्यन्तं सर्वशास्त्रमधिगम्य विंशतिवर्षपर्यन्तं नारोपादसमीपे प्रमाणमाध्यमिकपारमितानयादिशास्त्रं श्रुतम्। तदनु मन्त्रनयशास्त्रज्ञेन रागवज्रेण सहाऽवस्थितः पञ्चवर्षपर्यन्तम्। पश्चान्महापण्डितरत्नाकरशान्तिगुरुभट्टारकपादानां पार्श्वे....कारव्यवस्थां श्रुत्वा वर्षमेकं यावत्। पश्चाद् विक्रमशीलं गत्वा महापण्डितज्ञानश्रीमित्रपादानां पार्श्वे तत्प्रकरणं श्रुतं वर्षद्वयं यावत्। ततो विक्रमपुरे गत्वा संमतीयनिकाये मैत्रीगुप्तो नाम भिक्षुर्बभूव। सूत्राभिधर्मविनयं च श्रुत्वा वर्षचतुष्टयं यावत् पञ्चक्रमताराम्नायेन मन्त्रजपं कृत्वा कोटिमेकं चतुर्मुद्रार्थसहितेन भट्टारकेण स्वप्ने गदितं गच्छ त्वं खसर्पणम्। तत्र विहारं परित्यज्य खसर्पणं गत्वा वर्षमेकं यावन्निषीदति। पुनरपि स्वप्ने गदितं गच्छ त्वं कुलपुत्र दक्षिणापथे मनभङ्गचित्तविश्रामौ पर्वतौ तत्र स(श)बरेश्वरस्तिष्ठति, स च तवानुग्राहको भविष्यतीति। तत्र च मार्गे सागरनामा मिलिष्यति, स च चीनदेशवासिराजपुत्रस्तेनापि सार्धं गच्छ, पश्चाद् गते सति सागरेण मिलितम्। उड्रदेशपर्यन्तेन मनभङ्गचित्तविश्रामयोर्वार्तां न श्रुतवान्। श्रीधान्यं गत्वा वर्षमेकं स्थितवान्, पश्चाद्बाहुल्येन तत्र देशे साधिष्ठानतारां साधयितुमारब्धवान्। मासैकेन स्वप्नोऽभूत्। गच्छ त्वं कुलपुत्र वायव्यां दिशि पर्वतौ तिष्ठन्तौ पञ्चदशदिनेन प्राप्तव्यौ। भट्टारिकाया वाक्येन वायव्यां दिशं संघातैः सार्धं गच्छति प्राप्तिपर्यन्तं पुरुषेणैकेनोक्तं परमदिने मनभङ्गचित्तविश्रामौ प्राप्येते लग्नौ। तत्र सुखेन वस्तव्यम्। इति श्रुत्वा पण्डितपादो हृष्टोऽभूत्। अपरदिनं प्राप्तम्। तत्र पर्वते दिने दिने दश दश मण्डलानि कृतवान्। कन्दमूलफलाहारं कृत्वा दिनदशपर्यन्तं शिलातले पर्यङ्कमारुह्य एकाग्रचित्तेन उपवासं कर्तुमारब्धः। सप्तमे दिवसे स्वप्नदर्शनं भवति। दशमे दिवसे ग्रीवां छेत्तुमारब्धः। तत्क्षणात् साक्षाद्दर्शनं भवति सेकं ददाति। अद्वयवज्रनामाऽभूत्, पञ्चक्रमचतुर्मुद्रादिव्याख्यानं कृतं द्वादशदिनपर्यन्तम्। पुनरप्युपदेशेन पञ्चदिनं यावत् सर्वधर्मदृष्टान्तेन वीणां वादयति। तत्र पद्मावली ज्ञानावली। स(श)बरेश्वरेण आज्ञां दत्त्वा प्राणातिपातादिमायां दर्शय त्वम्। तदनन्तरं सागरः कायव्यूहं वर्धयते। पण्डितपादेनोक्तः—भगवन् किमप्यहं कायव्यूहं निर्मायितुमशक्तः? स(श)बरेश्वर आह—विकल्पसंभूतत्वात्। पण्डित आह—तर्हि किं कर्तव्यं मम ज्ञापयन्तु पादाः? स(श)बराधिप आह—तवेह जन्मनि सिद्धिर्नास्ति देशनाप्रकाशनाः कुरु। अद्वयवज्र आह—अशक्तोऽहं भगवन् कर्तुं कथं करिष्यामि। आह—इह वज्रयोगिन्युपदेशात् करिष्यसि त्वम्, फलं च फलिष्यतीति। इहोपदेशमुक्त्वा भट्टारकपादो ऽन्तर्धानोऽभूत्।

नेदं धनुर्न च मृगा न वराहपोतः सम्पूर्णचन्द्रवदना न च सुन्दरोयम् ।
निर्माणनिर्मिततयाऽर्थिजनस्य हन्त संतिष्ठते गिरितले स(श)बराधिराजः ॥

॥ अमनसिकारयथाश्रुतक्रमः समाप्तः ॥

नमः सर्वज्ञाय । पूर्ववदकारादिचक्रं संपूज्य विहितभगवतीयोगः प्रणवपीठादागतवदनः काण्डपीठाद् बहिर्गत्वा कृतपञ्चमण्डलोदग्दक्षिणः प्रणवपीठागतवदन उपायचक्रं लिखित्वा प्रवेश्य नाथाङ्कितशिरस्कः स्वहृदि चक्रं संस्फार्य वक्त्रेण वक्त्रं दत्त्वा तद्धृदि ध्यानं मुखमापूर्य वज्रभूतोऽष्टोत्तरशतमन्त्रितं कृत्वा "मुहे मुहं दइ मेल" तत उपायचक्रमिति भ्रमन्तं विचिन्त्य मन्त्रितपुष्पताडनं डमरुं घण्टां वा संवाद्य साटोपं मन्त्रमुच्चारयन् धूपं दद्याद् । यदि तस्य प्रकम्पादिनिमित्तमुपार्जयेत्तदैव कथनीयं नैवान्यथा, तदनु चक्रादुद्धृत्य मन्त्रदाने गुरुपरम्पराकथनं कर्तव्यमिति सम्प्रदायविधिः ॥ एतदभिसन्धाय गुरुपर्वक्रमाम्नायसम्प्रदायैकगोचरमिति । तत्कथा च कथितव्या श्रद्धोत्पादनार्थम् । शिष्यज्ञानाकृष्टिरभिधीयते । इह जन्मनि यदि न सिद्ध्यति तदा मरणसमये चक्रं तन्मुखात् स्वमुखे प्रविश्य स्वस्थान एव लीन इति लूयीपादोपदेशात् संवरार्णवतन्त्रमानेतुमोडियानं गतस्तत्र योगिनीपार्श्वे दिनचतुष्टयं यावत् स्थितश्चौर्येण तत्तन्त्रमानीतं नदीपारे तया दृष्टम् एतत्साधनं सर्वमपि वायुना नीतं वज्राङ्गनासकाशे । कुकुरीपादैः श्रुतमिन्द्रभूतिपादैर्लक्ष्मींकराविरुवापादैः पैण्डपातिकडिङ्गरपैण्डपातिकाः ।

नमः श्रीवज्रयोगिन्यै । प्रथमं यथासंभवं पूजोपकरणं कुर्यात् । अग्रे वलिं स्थाप्य वामे मद्यपात्रं पञ्चपीयूषसंयुक्तम् । वामकरे चन्द्रो दक्षिणकरे सूर्यः । हृद्रश्मिनादेन नासापुटेन निश्चार्य करे विलीय करशोधनम्, तत्करे मद्यपात्रं पिधाय मन्त्रस्नानं पूजाद्रव्यं च प्रोक्षयेत् । मण्डलीकरणके त्रिकोणाकारेण मध्ये वं । उपरि यथाविधिगोपितदिव्योदकसमायुक्तसिन्दूरपूजा, अभावे पुष्पादिभिर्बीजपूजा । तदनन्तरं त्रिविशुद्धिमनुस्मरेत् । आत्मानं त्रैधातुकविशुद्धिकूटागारं विचिन्तयेत् । झटिति नाभिमण्डले भगवतीं भावयेत् । मुद्राद्वययोगजो वाग्जपः, तदनन्तरमग्रे निश्चार्य पूजास्तुतिरमृतास्वादनम् । सार्वभौतिकदिक्पालेभ्यः शेषामृतढौकम् । इति भगवतीसंहार्येत्याम्नायः ॥

5. डाकार्णवः

ग्रन्थ—डाकार्णव

संख्या—4-8

पत्रसंख्या—158, **पंक्ति** प्र० प०—12, **अक्षर** प्र० पं०—62,

आधार—नेपाली कागज, **लिपि**—नेवारी, **पूर्ण** ।

प्रारम्भ

ॐ नमः श्रीसर्ववीरवीरेश्वरीभ्यः ।

एवं मया श्रुतमेकस्मिन् समये भगवान् महावीरेश्वरः सर्वतथागतवीरकायवाक्चित्तवज्रयोगिनीभगेषु क्रीडितवान् । तत्र महावीरेश्वर उवाच—

इन्द्रजालं मया दृष्टं महासुखसमाधिना ।
संसारव्यवहारे न निर्वाणं प्रतिपद्यते ॥

तत्र मध्ये महाबिम्बं महं विन्दति इन्द्रियान् ।
वीरांश्च स्वस्वभावेषु शृण्वन्तु ज्ञानसागरान् ॥

योगिनीचक्रमध्ये तु पृच्छाम्यहं वाराहिका ।
इन्द्रजालं किमाख्यातं मया तु कोऽत्र संज्ञकः ॥

दृष्टं वाव महा चैव सुखं भुक्तं किमेतत् ।
समाधिर्नाम किं तत्र कृतं ते भुवनेष्वपि ॥

अन्त

इदमवोचद् भगवानात्तमनाः

अनन्तापर्यन्ताश्चैव कलिकाले भुवान्तरे ।
शाक्यसिंहेन तन्त्रं च कथितो योगपारगम् ॥

श्रोतारं स्वयमे शास्ता वक्तारं च परे जने ।
सुभाषितं भाष्यमानं तन्मयं च गतिर्भवेत् ॥

मयाभिस्मा गतिं प्राप्तं संगीतिकारकादिभिः ।
संगीतिवज्रपीठेषु स.........................तिः ॥

अर्धे सनार्धे सनश्च कृत्वा परस्परं मतम् ।
भगवतो भाषितं च अभ्यनन्दमिदं वचः ॥

मुक्ता गच्छन्ति पापैस्तु भवस्यासयमानताः ।
इत्याह भगवान् स्वामी वज्रडाकस्तथागतः ॥

सर्ववीरसमायोगाद् वज्रसत्त्वः परं सुखम् ।

पुष्पिका

इति श्रीडाकार्णवमहायोगिनीतन्त्रराजे योगज्ञानसंवरक्रियातत्त्वार्णवासीतडाकार्णवादिमं नाम तुल्यं तन्त्रराजं समाप्तः ॥

अतिरिक्त

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोधो ह्येवंवादी महाश्रमण: ॥
योऽसौ धर्मः सुगतगदितः पठ्यते भक्तिभावाद्
मात्राहीनः कथमपि पदं पादगाथाक्षरं वा ।
जिह्वादोषः पवनचरितैः श्लेष्मदोषः प्रचारे
यूयं बुद्धाः स्वभवनगता बोधिसत्त्वाः क्षमध्वम् ॥

श्रेयोऽस्तु संवत् 983 मिति पौषशुक्लपूर्णिमा पर प्रतिपदा सोमवारदिने लिखितं सम्पूर्णमिति ।

विवरण

इस ग्रन्थ की माइक्रोफिल्म राष्ट्रीय अभिलेखालय, काठमाण्डू से शान्तरक्षित ग्रन्थालय में प्राप्त हुई है, जिसके आधार पर यह विवरण दिया जा रहा है।

यह ग्रन्थ कई दृष्टि से महत्त्वपूर्ण है—

1. यह स्वतन्त्ररूप से मूल तन्त्र है, इसमें किसी दूसरे ग्रन्थ से उद्धरण नहीं लिये गये हैं और इसको प्राय: सभी प्राचीन ग्रन्थकारों ने उद्धृत किया है ।

2. कारिडर के सूचीपत्र से ज्ञात होता है कि इस ग्रन्थ के आधार पर महापण्डित जयसेन ने निम्नलिखित 4 ग्रन्थों की रचना की है—

1—डाकार्णवतन्त्र मण्डलचक्रसाधन—रत्नपद्मरागनिधि
2—डाकार्णवतन्त्र होमविधि—रत्नसूर्यकान्त
3—डाकार्णवतन्त्र अभिषेकविधि—रत्नगर्भकोश
4—डाकार्णवतन्त्र बलिविधि—रत्नाश्मगर्भ

3. कारिडर कैटलाग से ही यह भी ज्ञात होता है कि श्रीपद्मवज्र ने इस पर वोहित्थ नामक टीका लिखी है ।

4. यद्यपि मूल ग्रन्थ संस्कृत में है, किन्तु इसके बीच-बीच में पर्याप्त मात्रा में अपभ्रंश के अंश आये हैं। इन अंशों को एकत्र कर उनकी व्याकरण दृष्टि से शुद्धि, संस्कृत छाया, तिब्बती पाठ के साथ तुलना तथा पाठान्तर आदि द्वारा अत्यन्त श्रमसाध्य सम्पादन करके 'डाकार्णव' नाम से श्री नगेन्द्रनारायण चौधरी ने 1935 ई० में कलकत्ता से प्रकाशित कराया था । इससे पूर्व इसके कुछ अंशों का परिचय म० म० हरप्रसाद शास्त्री जी अपने "हजार वचनेर पुराण बांगला भाषाय बौद्ध गान ओ दोहा" में दे चुके थे । उक्त दोनों विद्वानों का अभिमत है कि इसमें आये हुए अपभ्रंश अंश

प्राचीन बंगला भाषा के हैं, जो भाषावैज्ञानिक दृष्टि से अत्यन्त महत्त्वपूर्ण हैं। इसलिये यह अपभ्रंश के, विशेषतः शौरसेनी प्राकृत के अध्येताओं के लिये अत्यन्त उपयोगी ग्रन्थ है।

5. एस० बी० दास गुप्ता ने अपने "एन इंट्रोडक्सन टू तान्त्रिक बुद्धिज्म" की बिब्लियोग्राफी में डाकार्णव शास्त्री एडिसन और चौधरी एडिसन कह कर अलग-अलग उद्धरण दिये हैं, इससे ऐसा लगता है म० म० हरप्रसाद शास्त्री जी ने इस ग्रन्थ का सम्पादन व प्रकाशन किया था। एशियाटिक सोसाइटी कैटलाग भाग 1 (बुद्धिस्ट पाम लीव) पृष्ठ 91 में शास्त्री जी ने लिखा है— इसके 3 पटल मैंने प्रकाशित करा दिये हैं, किन्तु यह संस्करण हमें देखने को नहीं मिला।

6. श्री चौधरी ने जिस पाण्डुलिपि को आधार माना है और जिनसे पाठभेद दिये हैं, उनसे यह पाण्डुलिपि, जिसका ऊपर विवरण दिया गया है, भिन्न है, क्योंकि इसके पाठों में उनसे बहुत अन्तर है।

विषयनिर्देश

इस ग्रन्थ में 51 पटल हैं। प्रत्येक पटल की पुष्पिका से उसमें प्रतिपादित विषय ज्ञात हो जाता है, अवान्तर पुष्पिकाएँ इस प्रकार हैं—

इस ग्रन्थ के 49वें पटल में निम्नलिखित 25 प्रकरण हैं—

इति प्रकरणं नवमः [मातृग्रहकठपूतनादियोगसाधनम्] पृ० 141

इति प्रकरणं दशमः [वज्रजटिलोद्भवयोगसाधनम्] पृ० 142

इति प्रकरणमेकादशमः [सिद्धौषधिस्वभावकवंशाकारसमायोगादमृतविरूपणम्] पृ० 143

इति प्रकरणं द्वादशमः [ज्ञानसहजोपदेशः] पृ० 144

इति प्रकरणं त्रयोदशमः [ज्ञानचर्याव्रतधारणस्येन्द्रियग्रामसौख्यम्] पृ० 144

इति प्रकरणं चतुर्दशमः [सत्त्वबोधिरूपमहात्मनां भावकारणकस्थितिः] पृ० 145

इति प्रकरणं पञ्चदशमः [गुह्ययोगसाधनम्] पृ० 147

इति प्रकरणं षोडशमः [सहजचक्षुर्वर्णकयोगसाधनम्] पृ० 148

इति प्रकरणं सप्तदशमः [ज्ञानाद्वैतप्रकरणम्] पृ० 148

इति प्रकरणमष्टादशमः [रत्नवज्रप्रयोगसाधनम्] पृ० 149

इति प्रकरणमेकोनविंशतिमः [हयग्रीवप्रयोगसाधनम्] पृ० 150

इति प्रकरणं विंशतिमः [प्रभञ्जनप्रयोगसाधनम्] पृ० 151

इति प्रकरणमेकविंशतिमः [स्वयंवेद्यलक्षणयोगप्रकरणम्] पृ० 152

इति प्रकरणं द्वाविंशतिमः [पद्मनर्तेश्वरयोगसाधनम्] पृ० 152

इति प्रकरणं त्रयोविंशतिमः [वैरोचनयोगसाधनम्] पृ० 153

इति प्रकरणं सर्वपीठात्मकं चतुर्विंशतिमः [वज्रसत्त्वयोगसाधनम्] पृ० 154

इति प्रकरणं पञ्चविंशतिमः [सर्वरहस्यस्थानकवज्रसत्त्वयोगसाधनम्] पृ० 155

चतुर्थ से 25 वें प्रकरण तक पुष्पिका में केवल प्रकरण का ही उल्लेख किया है, उसमें प्रतिपादित विषय का नहीं, अतः प्रत्येक प्रकरण में जो विषय आया है, उसे हमने [ ] कोष्ठ के अन्दर दे दिया है।

6. अध्यात्मसारशतकम्

ग्रन्थ—अध्यात्मसारशतक (सटीक)
ग्रन्थकार—प्रभाकर गुप्त, (टीकाकार—शिरोमणि ?)
संख्या—22859 (फोटो प्रति)
पत्र सं०—40, **पंक्ति प्र० पृ०** 14, **अक्षर प्र० पं०** 42
आधार—नेपाली कागज, **लिपि**—देवनागरी, अपूर्ण।

प्रारम्भ

नमः श्रीवज्रसत्त्वाय।
नत्वा देवीमसमसुखदामुग्रतारामजस्र-
मासंसारं सुगदचरणं धर्मयुक्तं ससंघम्।
शश्वत्पादारविन्दे गुरुमपि च तथाऽध्यात्मसारस्य चार्थं
वक्ष्ये संक्षेपतोऽद्य प्रवरगुणगणं शिष्यवाञ्छानुरोधात्॥

यथा वाञ्छा च बन्धूनां हृत्कीर्तिरूपराजयोः ।
तथोवाच यथाशक्त्या त्वालापोऽर्थशिरोमणिः ॥ (टीका)
एकानेकव्युपरतिसुखैः सिद्धचारैरनेकैः
क्षित्यादीनां न मिलति यतो वस्तुसिद्धिः कुहापि ।
विज्ञानान्तं तदिह सकलं निःस्वभावं समन्ता–
न्नैवाकस्मात् स्फुरति नियमाद् देशकालाकृतीनाम् ॥ 1 ॥ (मूल)

अन्त

गुह्याद् गुह्यं कथितमभितोऽध्यात्मसारं यदेतत्
सिद्धाम्नायं झटिति फलदं चाभिषिक्ताय देयम् ।
निर्गर्वाय स्वतनुधनभार्यादिसर्वस्वहात्रे
संविग्नाय स्वपरमरणादर्थिने साधकाय ॥ 100 ॥

अध्यात्मसारसर्वस्वमिदं विधाय
श्रीमान् प्रभाकरबुधः कृपयाऽवधूतः ।
यल्लब्धवानभिमतं कुशलं विशालं
तेनाविनष्टवपुषा सुखितोऽस्तु लोकः ॥ 101 ॥

अध्यात्मसारसर्वस्वशतके ये विपश्चितः ।
तेषां चरणपद्मानि सेवध्वं हे मुमुक्षवः ॥ 102 ॥

पुष्पिका

अध्यात्मसारशतकं समाप्तमिति ।
॥ कृतिरियं प्रभाकरगुप्तपादानाम् ॥

विवरण

इस ग्रन्थ की मूलकापी की, जो नेवारी लिपि में ताड़पत्र पर है, तथा उसी की प्रतिलिपि जो देवनागरी में की गई है, दोनों की जोराक्स कापी राष्ट्रीय अभिलेखालय काठमांडू से शान्तरक्षित ग्रन्थालय में आई हैं, देवनागरी वाली प्रतिलिपि से यह विवरण दिया जा रहा है। ये दोनों प्रतियाँ अपूर्ण हैं। इनमें मूल के श्लोक 74 तक और टीका 72 तक ही उपलब्ध है। बीच में भी मूल व टीका 47 तथा 63 वें श्लोक की नहीं है। नेवारी वाली प्रति में अपाठ्य होने से देवनागरी में भी वह अंश छूट गया है। जापान से आये हुए प्रकीर्ण पत्रों में खोजने पर मुझे इसके 82 से अन्त तक के मूल श्लोक उपलब्ध हुए हैं। ऊपर जो अन्त का अंश उद्धृत है, वह नेवारी लिपि में उन्हीं प्रकीर्ण पत्रों से लिया गया है। फिर भी 8 श्लोकों के बिना यह ग्रन्थ अपूर्ण ही रह जाता है।

यह ग्रन्थ यद्यपि योगक्रिया से संबन्ध रखता है, जैसा कि ग्रन्थकार ने 9वें श्लोक में स्पष्ट कहा है—

गत्यागत्यादिकमिह यथा वस्त्वभावेऽपि मोहा-
न्मायास्वप्नप्रतिममपरं जन्म चास्ते तथैव।
तन्मिथ्यादृक्पतितवचनात् संशयं चाप्यपास्य
प्राज्ञैर्योगाभ्यसनविधिना जन्मनाशो विधेयः॥

तथापि जन्ममरण से छुटकारा पाने के लिये दार्शनिक सिद्धान्तों के साथ समन्वय करते हुए श्वासप्रक्रिया पर नियन्त्रण इसका उद्देश्य है। ग्रन्थ अपने में अत्यन्त महत्त्वपूर्ण है।

7. स्वाधिष्ठानप्रभेदः

ग्रन्थ—स्वाधिष्ठानप्रभेद

ग्रन्थकार—आर्यदेव

विशेष—इस ग्रन्थ का संक्षिप्त विवरण हम 'धीः' के अंक 4, पृष्ठ 22 पर दे चुके हैं, किन्तु कई विद्वानों ने इसकी महत्ता और दुर्लभता को देखते हुए इसे संपूर्ण ही 'धीः' में प्रकाशित कराने का आग्रह किया है, अतः यह पूर्ण ग्रन्थ यहाँ प्रकाशित किया जा रहा है—

ज्ञानमूर्ति नमस्कृत्य सर्वदृष्टिविदारकम्।
स्वाधिष्ठानप्रभेदोऽयं वक्ष्यते कृपया मया॥ 1॥

अस्तीति कल्पना यावत् तावच्छाश्वतकल्पना।
शाश्वताभिनिवेशोऽयं नेदं मायास्वलक्षणम्॥ 2॥

नास्तीति कल्पना यावत् तावदुच्छेदकल्पना।
उच्छेदाभिनिवेशोऽयं नेदं मायास्वलक्षणम्॥ 3॥

अस्तिनास्तित्वनिर्मुक्ता मध्यमा या तु कल्पना।
मध्यमाभिनिवेशोऽयं नेदं मायास्वलक्षणम्॥ 4॥

यत् सत्यं संवृतिः प्रोक्तं बुद्धानां कायलक्षणम्।
सेयं माया समुद्दिष्टा स्वाधिष्ठानमिहोच्यते॥ 5॥

येन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्।
यो नाप्यतेऽल्पपुण्यैस्तु व्याकृते(तै)रेव लभ्यते॥ 6॥

नात्र शौचं न नियमो न तपो न च दुष्करम्।
अदुष्करैरनियमैः सुखैर्हसै(र्षै)श्च सिद्ध्यति॥ 7॥

एवं विज्ञाय तत्त्वज्ञो यं स्मरेच्च मुहुर्मुहुः ।
सिद्धयते तस्य बुद्धत्वं सर्वं मायाविकुर्वितैः ॥ 8 ॥
मायास्थं च सदा देवाः पालयन्तीह योगिनः ।
सर्वज्ञेयं भवत्येव मायोपमसमाधिना ॥ 9 ॥
वज्रायुधं महावीर्यं सर्वमारोग्यसत्सुखम् ।
बुद्ध-ऋद्धिं च संप्राप्य यात्युत्पतति स्वेच्छया ॥ 10 ॥
वशमायान्ति सत्त्वाश्च दर्शनेनैव चोदिताः ।
लभते वाञ्छितं सर्वं मायोपमसमाधिना ॥ 11 ॥
स्वप्नमायोपमान् धर्मान् बौद्धाः सर्वे वदन्त्यपि ।
सत्यं ते न प्रजानन्ति स्वाधिष्ठानबहिर्मुखाः ॥ 12 ॥
वायुविज्ञानसंयुक्तं छायाकार(रं) मनोमयम् ।
स्वज्ञानं ते न पश्यन्ति [माया]दृष्टान्तमोहिताः ॥ 13 ॥
अनन्तेष्वपि कल्पेषु श्रुतिपारङ्गतैरपि ।
गुरुवक्त्राद् विना माया साक्षात्कर्तुं न शक्यते ॥ 14 ॥
तस्मान्मानं परित्यज्य बुद्धत्वफलकाङ्क्षया ।
वज्रयानं समारुह्य यत्नेनाराधयेद् गुरुम् ॥ 15 ॥
इदानीं च प्रवक्ष्यामि क्रमभेदं सुदुर्लभम् ।
यं ज्ञात्वा विचरेद् योगी सर्वबुद्धमयो भवेत् ॥ 16 ॥
पृथिव्यादीनि चत्वारि तथा शून्यचतुष्टयम् ।
.... विनाशोत्पत्तिहेतवः ॥ 17 ॥

[1]प्रभास्वरान्महाशून्यं तस्माच्चोपायसंभवः ।
तस्मादुत्पद्यते प्रज्ञा तस्याः पवनसंभवः ॥ 18 ॥
पवनादग्निसंभूतिरग्ने[श्च] जलसंभवः ।
जलाच्च जायते पृथ्वी सत्त्वानामेष संभवः ॥ 19 ॥
भूधातुर्लीयते तोये तोयस्तेजसि लीयते ।
तेजश्च सूक्ष्मधातौ च वायुश्चित्ते विलीयते ॥ 20 ॥
चित्तश्चैतसिके लीये[ता]विद्यायां तु चे(चै)तसम् ।
सोऽ(सा)पि प्रभास्वरं गच्छेन्निरोधोऽयं भवत्रये ॥ 21 ॥

1. यहाँ से चार श्लोक (18-21) सेकोद्देशटीका (पृ० 51-52) में आर्यदेवपाद और आर्यपाद के नाम से उद्धृत हैं ।

अनादिकालिकं ह्येवं भवचक्रं प्रवर्तते ।
यावन्न पश्यत्यात्मानं मायोपमसमाधिना ॥ 22 ॥

स्वसंवेद्यो(द्या) हि सा माया तार्किकाणामगोचरा ।
निजदेहस्थितौ चापि मन्दपुण्यो(ण्यैः) न लभ्यते ॥ 23 ॥

ज्ञायते परमेकेन स्वदेहे साऽविकारिणी ।
गुरुपादप्रसादेन दृष्टान्तैरुपलक्षिता ॥ 24 ॥

निधयो मणयश्चापि पृथिव्यामुदकं यथा ।
विद्यमाना न दृश्यन्ते तथा देहेषु सर्ववित् ॥ 25 ॥

मायामरीचिर्गन्धर्वनगरः शक्रकार्मुकम् ।
दर्पणः(ण) प्रतिबिम्बश्चोदकचन्द्र[ः] प्रतिध्वनिः ॥ 26 ॥

स्वप्नमायाभूपटलं विद्युद्बुद्बुदसंज्ञिता ।
माया द्वादशदृष्टान्तैर्विस्तरा चैकलक्षणा ॥ 27 ॥

आसां विस्पष्टतारूपं यद्देवतालम्बनं प्रति ।
मायात्रयं समुद्दिष्टं यत्नतस्तत्प्रकीर्त्यते ॥ 28 ॥

दर्पणप्रतिबिम्बं च शक्रचापमथापरम् ।
तृतीयं जलचन्द्रं च मूर्तिमेतैर्विभावयेद् ॥ 29 ॥

सूतके यत्समुद्दिष्टं यच्च बुद्धकुलं महत् ।
तत्तत्कुलसमुद्भूता देवताश्च पृथग्विधाः ॥ 30 ॥

दूतदूत्यस्तथा क्रोधाश्चेटचेट्यश्च किङ्कराः ।
न ते सन्ति न भाः(ताः) सन्ति सत्त्वार्थं प्रति दर्शिताः ॥ 31 ॥

एतत्सर्वं हरेद् योग(गी) संहरेदपि चात्मना ।
मायोपमसमाधिस्थो मण्डलाद्यपि विस्तरम् ॥ 32 ॥
वर्णान् नानाविधांश्चापि स्वाधिष्ठानेन योजयेत् ।
शोकं भयं विरागं च सन्त्रासं स्खलितं तथा ॥ 33 ॥
दुष्टं च दौर्मनस्यं च दुर्दृष्टं दुष्कृतं तथा ।
दुर्गन्धं दूरसं चापि दुःस्पर्शं चैव यद् भवेत् ।
तास्ता विरूपाः प्रकृतां(तीः) स्वाधिष्ठानेन शोधयेत् ॥ 34 ॥
विण्मूत्रादिप्रवृत्तिश्च ज्वराद्या व्याधयश्च ये ।
स्वाभाविका जराद्याश्च तेषां माया चिकित्सितम् ॥ 35 ॥

येन धर्मेण बालानां संसारो भुवि वर्धते ।
[1] योगिनस्तेन धर्मेण संसारो न विवर्धते ।। 36 ।।
सुखाः कामगुणाः पञ्च बालानां बन्धने मताः ।
योगिनस्तेन धर्मेण बुद्धत्वं साधयेत् पुनः ।। 37 ।।
रागो हर्षस्तथा प्रीतिर्मैत्री च करुणा तथा ।
उपेक्षा मुदिता चैव बलमुत्साह एव च ।। 38 ।।
शौर्यं वीर्यं तथा रौद्रं हठत्वं साहसं तथा ।
स्वरूपाः प्रकृतीश्चान्याः स्वाधिष्ठानेन संच(ह)रेत् ।। 39 ।।
एकमुद्रासमायुक्तश्चतुर्मुद्रायुतोऽथवा ।
अन्तःपुरगतो वापि स्वाधिष्ठानमनुस्मरेत् ।। 40 ।।
रूपं शब्दं तथा गन्धं रसं स्पर्शं च शोभनम् ।
अनुभूयात् सदा योगी महासुखपदे स्थितः ।। 41 ।।
ततं चैवावनद्धं च घण्टं शुषिरमेव च ।
वाद्यं चतुर्विधं योगी स्वाधिष्ठानेन निर्विशेत् ।। 42 ।।
शृङ्गारादीन् रसान् सर्वान् नवनाटकसंज्ञकान् ।
अनुभूयात् सदा योगी मायोपमसमाधिना ।। 43 ।।
योगतन्त्रे समुद्दिष्टाश्छोमाद्या ये च विस्तराः ।
तांश्च प्रवर्तयेद् योगी माययाऽनुपलम्भतः ।। 44 ।।
उन्मिषन् निमिषन् वापि हसन् जल्पंस्तथैव च ।
गच्छंस्तिष्ठन् स्वपन् भुञ्जन् मायादेहमनुस्मरेत् ।। 45 ।।
जगत्यन्याश्च याः क्रीडा नानासङ्कल्पकल्पिताः ।
विचरेत् ताश्च तत्त्वज्ञो महारागनये स्थितः ।। 46 ।।
स्वाधिष्ठानमिदं प्राप्य सर्वदृष्टिविदारणम् ।
सर्वं कुर्यान्न कुर्याद् वा यथारुचितचेष्टितः ।। 47 ।।
चैत्य कर्म न कुर्वीत न च पुस्तकवाचनम् ।
करोतु वाचयेच्चापि स्वाधिष्ठानक्रमेण तु ।। 48 ।।
देवान् न वन्दयेदेवं भिक्षूंश्चापि न वन्दयेत् ।
अथवा वन्दयेत् सर्वान् स्वाधिष्ठानक्रमेण तु ।। 49 ।।

---

1. "योगिनः''''कर्म शुभानि यद्वत्" (श्लो० 36-55) ये सभी श्लोक गुह्यादि-अष्टसिद्धिसंग्रह में प्रकाशित अन्तिम सिद्धि (पृ० 212-213) में मुद्रित हैं ।

मन्त्रन्यासं न कुर्वीत मुद्राबन्धं तथैव च ।
मन्त्रजापं न कुर्याद्वा कुर्याच्च प्रतिबिम्बवत् ॥ 50 ॥

मदीयं दृश्यते चित्तं बाह्यमर्थं न विद्यते ।
एवं वै भावयेन्मायां तथतामप्यनुस्मरेत् ॥ 51 ॥

अनन्तध्यानविधिना मन्त्रमूर्तिसमाधिना ।
यदि माया न लब्धा स्यात् सर्वभूमिफलाय वै ॥ 52 ॥

देहभोगप्रतिष्ठा च भूमिपारमितादयः ।
बुद्धऋद्धिविकुर्वादि सर्वं मायाविचेष्टितम् ॥ 53 ॥

आदर्शबिम्बे सकलं स(सु)युक्तं रूपं यथा स्वच्छतरं विभाति ।
अशीत्यनुव्यञ्जनलक्षणाढ्यो देहस्तथा वज्रधरः सदैव ॥ 54 ॥

[1]इन्द्रायुधं वियति दृष्टमनेकवर्णं लोकस्य दर्शयति कर्म शुभानि यद्वत् ।
एवं च वज्रधृगवाप्य सितादिवर्णं [सम्पा]दयत्यविकलं खलु [कर्म] तद्वत् ॥ 55 ॥

यद्धेमरूप्यमणिशङ्खशिलाप्रवालवैडूर्यताम्ररजतादिषु संस्थितश्च ।
तत्रैव(क) एव हि शशी गगनोदरान्ताद्या(दा)वर्तमानवपुषा प्रतिभाति यद्वत् ॥ 56 ॥

एवं स नाथः खलु चित्तवज्रो नानाविधस्तिष्ठति जन्तुवर्गे ।
स चाप्ययं स्वात्मनि विश्वरूपो मायामयो व्याप्तसमस्तलोकः ॥ 57 ॥

रूपादिपञ्चकमथायतनानि यानि अष्टादशेति चोदिताः खलु धातवश्च ।
ज्ञानानि पञ्च विषयाश्च जगत्समस्तं मायामयः स इह वज्रधरोऽपि नान्यत् ॥ 58 ॥

यं पर्वता अष्टमहासमुद्रा द्वीपाश्च सर्वे नरकादिभेदाः ।
यत् स्थावरं जङ्गममेव दृष्टं तत्तत् स्वयं सर्वविदेव नान्यत् ॥ 59 ॥

एवं स्वचित्तमयमेव जगत्समस्तं विज्ञाय मोक्षभवकल्पनया विमुक्ताः ।
ये न भ्रमन्ति भवकल्पमहार्णवेषु तेभ्यो नमोऽस्त्वखिलसंस्कृतपारगेभ्यः ॥ 60 ॥

॥ स्वाधिष्ठानप्रभेदः समाप्तः । कृतिरियमार्यदेवपादानाम् ॥

———

1. अमृतकणिकाकारस्य नामसंगीतिटिप्पण्याधारेण पूरितोऽत्र पाठः ।

लुप्त बौद्ध वचन संग्रह

—डॉ० बनारसीलाल—

[इस शीर्षक के अन्तर्गत 'धीः' के पिछले अंकों में अनेक ग्रन्थ एवं ग्रन्थकारों के लुप्तप्राय वचनों का संग्रह किया गया था। प्रस्तुत अंक में मध्यमकशास्त्र की व्याख्या प्रसन्नपदा, बोधिचर्यावतारपंजिका तथा डाकिनीजालसंवररहस्य में उद्धृत तन्त्र एवं धारणियों के वचन संकलित किये गये हैं।]

आदिबुद्ध

[1]च्युतेर्हि(वि)रागसंभूतिर्विरागाद् दुःखसंभवः।
दुःखाद्धातुक्षयः पुंसां क्षयान्मृत्युरिति स्मृतः॥

[2]गुणापर्यन्तस्तोत्र

[2]यतः प्रज्ञातत्त्वं भजति करुणा संवृतिमतः
तवाभून्निःसत्त्वं जगदिति यथार्थं विमृशतः।
यदा चाविष्टोऽभूर्दशबलजनन्या करुणया
तदा तेऽभूदार्ते सुत इव पितुः प्रेम जगति॥

चक्रसंवर

[3]संवृत्या सत्त्वा अधोरेतसः, विवृत्या ऊर्ध्वरेतसः।

चतुष्पीठ

[4]मन्त्रादात्मपीठम्, आत्मपीठात्परपीठम्, परपीठात्तत्त्वपीठम्, यावदेति तदिति बोधिचित्तम् अवधूत्यां संवरेणेति पदसंचारक्रमः।

---

1. डा० जा० सं० र०, पृ० 4.
2. बोधिचर्यावतारपंजिका पृ० 229. सम्पादक ने उक्त श्लोक को रत्नदासविरचित गुणापर्यन्तस्तोत्र के 33वें श्लोक के रूप में इंगित किया है।
3. डा० जा० सं० र०, पृ० 5.
4. डा० जा० सं० र,० पृ० 4.

तथागतगुह्यसूत्र

(1)

[1]यां च रात्रिं शान्तमते तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धः, यां च रात्रिमनुपादाय परिनिर्वास्यति, अत्रान्तरे तथागते नैकमप्यक्षरं नोदाहृतं न व्याहृतं नापि प्रव्याहरति नापि प्रव्याहरिष्यति। अथ च यथाधिमुक्ताः सर्वसत्त्वा नानाधात्वाशयास्तां तां विविधां तथागतवाचं निश्चरन्तीं संजानन्ति। तेषामेवं पृथक् पृथग् भवति—अयं भगवानस्मभ्यमिमं धर्मं देशयति, वयं च तथागतस्य धर्मदेशनां शृणुमः। तत्र तथागतो न कल्पयति न विकल्पयति। सर्वकल्पविकल्पजालवासनाप्रपञ्चविगतो हि शान्तमते तथागतः।

(2)

[2]अथ खलु शान्तमतिर्बोधिसत्त्वो भगवन्तमेतदवोचत्—उपशम उपशम इति भगवन्नुच्यते, क एष उपशमो नाम? कस्य चोपशमादुपशम इत्युच्यते? भगवानाह—उपशम इति कुलपुत्र उच्यते क्लेशोपशमस्यैतदधिवचनम्। क्लेशोपशम इति संकल्पविकल्पपरिकल्पोपशमस्यैतदधिवचनम्। संकल्पविकल्पपरिकल्पोपशम इति संज्ञामनसिकारोपशमस्यैतदधिवचनम्। संज्ञामनसिकारोपशम इति विपर्यासोपशमस्यैतदधिवचनम्। विपर्यासोपशम इति हेत्वारम्बणोपशमस्यैतदधिवचनम्। हेत्वारम्बणोपशम इति अविद्याभवतृष्णोपशमस्यैतदधिवचनम्। अविद्याभवतृष्णोपशम इति अहंकारममकारोपशमस्यैतदधिवचनम्। अहंकारममकारोपशम इति उच्छेदशाश्वतदृष्ट्युपशमस्यैतदधिवचनम्। उच्छेदशाश्वतदृष्ट्युपशम इति सत्कायदृष्ट्युपशमस्यैतदधिवचम्। इति शान्तमते ये केचिदारम्बणहेतुदृष्टिसंयुक्ताः संक्लेशाः प्रवर्तन्ते, सर्वे ते सत्कायदृष्टेरुत्पद्यन्ते, सत्कायदृष्ट्युपशमात् सर्वदृष्ट्युपशम इति। सर्वदृष्ट्युपशमात्सर्वप्रणिधानोपशम इति। सर्वप्रणिधानोपशमात्सर्वक्लेशोपशमः। तद्यथापि नाम शान्तमते वृक्षस्य मूले छिन्ने सर्वशाखापत्रफलानि शुष्यन्ति, एवमेव शान्तमते सत्कायदृष्ट्युपशमात्सर्वक्लेशा उपशाम्यन्ते। सत्कायदृष्टौ शान्तमते अपरिज्ञातायां सर्वोपादानोपक्लेशा उत्पद्यन्ते। सत्कायदृष्टिपरिज्ञातोऽपि सर्वोपादानोपक्लेशा नोत्पद्यन्ते न बाधन्ते।

शान्तमतिराह—का पुनर्भगवन् सत्कायदृष्टिपरिज्ञा? भगवानाह—आत्मसमुत्थानं शान्तमते सत्कायदृष्टिपरिज्ञा सत्त्वासमुत्थानं जीवासमुत्थानं पुद्गलासमुत्थानं दृष्टिसमुत्थानं सत्कायदृष्टिपरिज्ञा। न खलु पुनः शान्तमते सा दृष्टिरध्यात्मं प्रतिष्ठिता, न बहिर्धा प्रतिष्ठिता। सा दृष्टिः सर्वतोऽप्रतिष्ठिता। यत्तस्या अप्रतिष्ठिताया दृष्टेरप्रतिष्ठितेति ज्ञानम्, इयं शान्तमते सत्कायदृष्टिपरिज्ञा। सत्कायदृष्टिपरिज्ञेति शान्तमते शून्यताया एतदधिवचनम्। यच्छून्यतानुलोमिक्या क्षान्त्या तां दृष्टिं नोद्गृह्णाति, इयमपि

1. मध्यमकशास्त्रम् (बौ० सं० ग्र० 10), पृ० 236.
2. मध्यमकशास्त्रम् (बौ० सं० ग्र० 10), पृ० 153-54.

शान्तमते सत्कायदृष्टिपरिज्ञा। सत्काय इति शान्तमते शून्यतानिमित्ताप्रणिहितानभिसंस्काराजातानुत्पाददृष्ट्या तां दृष्टिं नोद्गृह्णाति, इयमपि शान्तमते सत्कायदृष्टिपरिज्ञा। सत्काय इति शान्तमते अकाय एषः, न कसति न विकसति न चिनोति नोपचिनोति, आदित एव तदभूतं परिकल्पितम्, यच्च अभूतं परिकल्पितम्, तन्न परिकल्पितम्, न परिकल्प्यते न विकल्प्यते, तन्न क्रियते न विठप्यते, नोत्थाप्यते नाध्यवस्यते। तदुच्यते उपशम इति।

शान्तमतिराह—उपशान्त उपशान्त इति भगवन्नुच्यते, कस्योपशमादुपशान्त इत्युच्यते? भगवानाह—आरम्बनतः शान्तमते चित्तं ज्वलति। यन्न भूय आलम्बनीकरोति तन्न ज्वलति, अज्वलन् उपशान्त इत्युच्यते। तद्यथापि नाम शान्तमते अग्निरुपादानतो ज्वलति, अनुपादानतः शाम्यति एवमेव आलम्बनतश्चित्तं ज्वलति अनालम्बनतः शाम्यति। तत्र शान्तमते उपायकुशलोऽयं बोधिसत्त्वः प्रज्ञापारमितापरिशुद्धः आलम्बनसमतां च प्रजानाति कुशलमूलालम्बनं च शमयति।

बोधिचित्तविवरण

[1]देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोक उपायैर्बहुभिः पुनः॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्ना हि देशना भिन्ना शून्यताद्वयलक्षणा॥

रत्नचूडामणिमहायानसूत्र

[2]सर्वाकारवरोपेता शून्यता भावनीया योगिनेति।

लूयीपाद

[3]मलापगतचित्तस्य तत्राभ्यन्तरसंस्थितः।
उष्णबिम्बमहातेजाः प्रलयानलसंनिभः॥
चतुर्विंशतिवर्णेन करङ्को बलिमण्डितः।
विज्ञानाष्टनिरोधेन श्मशानं परिवेष्टितः॥
तन्मध्ये भावयेद् धीमान् ज्ञानविज्ञानसंभवम्।
ज्ञानेन तु करङ्काख्यं विज्ञानं ता(तो)रणं मतम्॥

---

1. सर्वदर्शनसंग्रह, पृ० 45. भाण्डारकर ओरियन्टल रिसर्च इंस्टीच्यूट, पूना 1978.
2. डा० जा० सं० र०, पृ० 9.
3. दुर्लभ ग्रन्थ परिचय, पृ० 33.

तस्योपरि स्थितं चन्द्रं शीतबिम्बं सुनिर्मलम् ।
षोडशस्वरसंभूतं छत्रं करङ्कया कृतम् ॥
तन्मध्ये भावयेद्योगी षड्भिर्डाकस्वभावतः ।
धर्माक्षरस्वरूपाख्यं कायत्रयैकसंवरम् ॥
तस्य पार्श्वस्थितं दिव्यं षड्भिः योगिनीसंभवः ।
धर्ममुख्येति विख्याता(तं) रहस्यं परमं पदम् ॥
चिन्तनीयं द्वयं बीजमासक्तमनुरक्तयः ।
महारागानुरागेण घनानन्दं प्रदर्शयेत् ॥
ऊकारस्तु हकाराधो हकारश्चचन्द्रलेखयोः ।
चन्द्रलेखागतं बिन्दौ तिष्ठेद् बिन्दु सुनिर्मलम् ॥
निराभासं निरालम्बं निर्निमित्तं निरञ्जनम् ।

वज्रपञ्जर

[1]षडङ्गं भावयेत्[2] तस्मात् स्वा[धि]ष्ठानसमं ततः ।
सर्वाङ्गसुन्दरं रम्यं सर्वासङ्गविवर्जितम् ॥
रम्यं तु डाकिनीचक्रं स्वाधिष्ठानं महाद्भुतम् ।
यदुदेति क्षणेनैव गुरुपादप्रसादतः ॥

वज्रमण्डधारणो

[3]तद्यथा मञ्जुश्रीः काण्डं च प्रतीत्य मथनीं च प्रतीत्य पुरुषस्य हस्तव्यायामं च प्रतीत्य धूमः प्रादुर्भवतीत्यग्निरभिनिवर्तते । स चाग्निसंतापो न काण्डसंनिश्रितो न मथनीसंनिश्रितो न पुरुषहस्तव्यायामसंनिश्रितः । एवमेव मञ्जुश्रीरसद्विपर्यासमोहितस्य पुरुषपुद्गलस्य उत्पद्यते रागपरिदाहो द्वेषपरिदाहो मोहपरिदाहः । स च परिदाहो नाध्यात्मं न बहिर्धा नोभयमन्तरेण स्थितः ।

अपि तु मञ्जुश्रीः यदुच्यते मोह इति, तत्केन कारणेनोच्यते मोह इति ? अत्यन्तमुक्तो हि मञ्जुश्रीः सर्वधर्मैर्मोहस्तेनोच्यते मोह इति । तथा नरकमुखा मञ्जुश्रीः सर्वधर्मा इदं धारणीपदम् । आह—कथं भगवन्निदं धारणीपदम् ? आह—नरका मञ्जुश्रीः बालपृथग्जनैरसद्विपर्यासविठपिताः स्वविकल्पसंभूताः । आह—कुत्र भगवन्नरकाः समवसरन्ति ? भगवानाह—आकाशसमवशरणा मञ्जुश्रीः

1. डा० जा० सं० र०, पृ० 8.
2. 'षडङ्गं भावयेद्' इतना अंश लु० बौ० व० सं०, पृ० 57 में संगृहीत हुआ है ।
3. मध्यमकशास्त्रम् (बौ० सं० ग्र० 10) पृ० 16-17.

नरकाः। तत्किं मन्यसे मञ्जुश्रीः स्वविकल्पसंभूता नरका उत स्वभावसंभूताः ? आह—स्वविकल्पेनैव भगवन् सर्वबालपृथग्जना नरकतिर्यग्योनियमलोकं संजानन्ति। ते च असत्समारोपेण दुःखां वेदनां वेदयन्ति दुःखमनुभवन्ति त्रिष्वप्यपायेषु।

तथा चाहं भगवन् नरकान् पश्यामि तथा नारकं दुःखम्। तद्यथा भगवन् कश्चिदेव पुरुषः सुप्तः स्वप्नान्तरगतो नरकगतमात्मानं संजानीते स तत्र क्वथितायां संप्रज्वलितायामनेकपौरुषायां लोहकुम्भ्यां प्रक्षिप्तमात्मानं संजानीयात्। स तत्र खरां कटुकां तीव्रां दुःखां वेदनां वेदयेत्। स तत्र मानसं परिदाहं संजानीयात् उत्त्रसेत् संत्रासमापद्येत। स तत्र प्रतिबद्धः समानः—अहो दुःखम्, अहो दुःखम् इति क्रन्देत् शोचेत् परिदेवेत्। अथ तस्य मित्रज्ञातिसालोहिताः परिपृच्छेयुः—केन तत्ते दुःखमिति। स तान् मित्रज्ञातिसालोहितानेवं वदेत् नैरयिकं दुःखमनुभूतम्। स तानाक्रोशेत् परिभाषेत्—अहं च नाम नैरयिकं दुःखमनुभवामि, यूयं च मे उत्तरि परिपृच्छथ केनैतत्तव दुःखमिति। अथ ते मित्रज्ञातिसालोहितास्तं पुरुषमेवं वदेयुः—मा भैर्भोः पुरुष। सुप्तो हि त्वम्। न त्वमितो गृहात् क्वचिन्निर्गतः। तस्य पुनरपि स्मृतिरुत्पद्यते—सुप्तोऽहमभूवम्। वितथमेतन्मया परिकल्पितमिति, स पुनरपि सौमनस्यं प्रतिलभते।

तद्यथा भगवन् स पुरुषोऽसत्समारोपेण सुप्तः स्वप्नान्तरगतो नरकगतमात्मानं संजानीयात्, एवमेव भगवन् सर्वबालपृथग्जना असद्‌रागपर्यवनद्धाः स्त्रीनिमित्तं कल्पयन्ति। ते स्त्रीनिमित्त कल्पयित्वा ताभिः सार्धं रममाणमात्मानं संजानन्ति। तस्य बालपृथग्जनस्यैवं भवति—अहं पुरुषः, इयं स्त्री, ममैषा स्त्री। तस्य तेन च्छन्दरागपर्यवस्थितेन चित्तेन भोगपर्येष्टिं चित्तं क्रामयति। स ततो निदानं कलहविग्रहविवादं संजनयति। तस्य प्रदुष्टेन्द्रियस्य वैरं संजायते। स तेन संज्ञाविपर्यासेन कालगतः समानो बहूनि कल्पसहस्राणि नरकेषु दुःखां वेदनां वेदयमानमात्मानं संजानाति।

तद्यथा भगवान् तस्य पुरुषस्य मित्रज्ञातिसालोहिता एवं वदन्ति—मा भैः, मा भैः, भो पुरुष। सुप्तो हि त्वम्। न त्वमितो गृहात् कुतश्चिन्निर्गत इति। एवमेव बुद्धा भगवन्तश्चतुर्विपर्यासविपर्यस्तानां सत्त्वानामेवं धर्मं देशयन्ति—नात्र स्त्री न पुरुषो न सत्त्वो न जीवो न पुरुषो न पुद्गलः। वितथा इमे सर्वधर्माः। असन्त इमे सर्वधर्माः। विठपिता इमे सर्वधर्माः, मायोपमा इमे सर्वधर्माः। स्वप्नोपमा इमे सर्वधर्माः। निर्मितोपमा इमे सर्वधर्माः। उदकचन्द्रोपमा इमे सर्वधर्माः। इति विस्तरः। ते इमां तथागतस्य धर्मदेशनां श्रुत्वा विगतरागान् सर्वधर्मान् पश्यन्ति। विगतमोहान् सर्वधर्मान् पश्यन्ति अस्वभावाननावरणान्। ते आकाशस्थितेन चेतसा कालं कुर्वन्ति। ते कालगताः समाना निरुपधिशेषे निर्वाणधातौ परिनिर्वान्ति। एवमहं भगवन् नरकान् पश्यामि। इति।

समन्तभद्र

[1]आकाशयवयोगेन गृह्णन्ति ज्ञानसागराः ।
अथ वज्रधरो राजा महासुखविवर्धनम् ॥
समयं देशयेत् सर्वं बुद्धत्वफलदायकम् ।
सुखैर्हृष्टैस्तथा नृत्यैर्गीतवाद्यैर्विकुर्वणैः ॥
गन्धमाल्यविलेपनस्तु विद्याराजः प्रसिद्ध्यति ।
यथा सुखं सुखं वाद्ये यथा रुचितचेष्टितम् ॥
यथाहारविहारोऽपि सिद्ध्यते परमाक्षरम् ।
खानपानप्रयोगैस्तु दिव्यालङ्कारभूषणैः ॥
सिद्ध्यते परमं तत्त्वं दिनेनैकेन चोदितः ।
नित्यं स्वसमयः साध्यो नित्यं पूज्यास्तथागताः ॥
नित्यं च गुरवे देयं तस्माद् बुद्धसमो गुरुः ।
यथा वैरोचनो नाथस्तथा वज्रधरो गुरुः ॥
यथाकाशो महाराजो वज्रधर्मो महामुनिः ।
समन्तराजो यथा नाथस्तथाचार्यः प्रगीयते ॥
तस्मात् सर्वप्रयत्नेन वज्राचार्यं महागुरुम् ।
प्रच्छन्नवरकन्यासं नावमन्यात् कदाचन ॥

[2]समाज

त्रिसाहस्रिके श्रीसमाजे बुद्धो भगवानाह—

[3]वज्रपर्यङ्कतश्चित्तं मण्यन्तर्गतमीक्षयेत् ।
निष्पन्दादिसुखापूर्णं वैमल्यं यावदेति तत् ॥

[4]संवरतन्त्र

[5]सर्वत्र सर्वतः सर्वं सर्वथा सर्वदा स्वयम् ।
सर्वरत्नादिवल्लोके सर्वभावान(भावो) भवत्यसौ ॥

---

1. डा० जा० सं० र०, पृ० 11
2. गुह्यसमाजतन्त्र में यह वचन प्राप्त नहीं होता है ।
3. डा० जा० सं० र०, पृ० 3.
4. ज्ञानसिद्धि 8.1-9 के ये श्लोक संवरतन्त्र के हो सकते हैं । 'सर्वाकाशावकाशे श्रीवज्रसत्त्वस्तथागतः' यह वचन संवरतन्त्र के नाम से धीः 9, पृ० 41 में प्रकाशित किया है । संवरतन्त्र सम्भवतः चक्रसंवरतन्त्र ही है ।
5. गु० अ० सि०, पृ० 152-53

बुद्धक्षेत्रेषु सर्वेषु बुद्धनिर्माणमावहन् ।
दर्शय बुद्धकार्याणि बुद्धनिर्माणमायया ॥
बुद्धवज्रधरादीनां विश्वरूपत्रिधात्मकैः ।
त्रैधातुकमहाराज सर्वकार्याणि दर्शय ॥
सन्धिविग्रहयुद्धं हि राज्यं मायाविकुर्वितम् ।
त्रैधातुक महाराज अवष्टम्भय साहसैः ॥
प्रमादोऽयं जगत् सर्वं विश्वनर्तित दर्शय ।
एवमाद्यैरनन्ताग्रैः धर्मधातुसमासमैः ॥
आकाशधातुपर्यन्तैः सर्वतो विश्वसंवरैः ।
सर्वाकाशावकाशैः श्रीवज्रसत्त्वस्तथागतः ॥
विक्रीडति विचित्रैः श्रीरतिक्रीडाविकुर्वितैः ।
सर्वतो विश्वविनयैः सत्त्वधातुं प्रसाधयेत् ॥
एवमाद्यास्त्वनन्ताग्राः धर्मधातुसमासमाः ।
आकाशधातुपर्यन्ताः सर्वबुद्धादयो वराः ॥
सर्वाकाशावकाशे श्रीवज्रसत्त्वे प्रतिष्ठिताः ।
समाविशन्ति सर्वात्मा सिद्धैश्वर्यप्रसिद्धिभिः ॥

संवरोत्तरे

[1]कामसिद्धिरित्युक्ता भगवता प्रज्ञातन्त्रत्वात् ।

———

1. डा० जा० सं० र, पृ० 4.

बौद्ध पारिभाषिक शब्दों का अभिप्राय

—ठिनलेराम शाशनी—

['धीः' के पिछले अंकों में इस स्तम्भ के अन्तर्गत अनेक ग्रन्थों से विशिष्ट पारिभाषिक शब्दों की व्याख्याएँ संकलित की गई हैं। प्रस्तुत अंक में आचार्य रविश्री कृत "अमृतकणिकानाम श्रीनामसंगीतिटिप्पणी" तथा "डाकिनीजालसंवररहस्यम्" से पारिभाषिक व्याख्याओं का संकलन किया जा रहा है। "अमृतकणिका" की पाण्डुलिपि डा० बनारसीलाल से प्राप्त हुई है, जो अभी अप्रकाशित है।]

अकारः

तद्यथा भगवान् बुद्धः संबुद्धोऽकारसम्भवः।
अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः ॥ (अमृतकणिका, पृ० 145)

अकारेणात्र प्रकृतिप्रभास्वरा महामुद्रा सहजानन्दरूपिणी प्रज्ञापारमिता उच्यते। सा च परमाणुधर्मतातीता आदर्शप्रतिसेनातुल्या। ततः सम्भवतीत्यकारसंभवः सम्यक्सम्बुद्धः प्रज्ञोपायात्मको वज्रसत्त्वो नपुंसकपदं सहजकाय इत्युच्यते। स चाकारः सर्ववर्णानामग्र्योऽनाहतत्वान्निरावरणत्वेन स्कन्धधात्वायतनविषयैकलोलीभावात्। उक्तं च—

ज्वलन्तं दीपसदृशं हृदि मध्यमनाहतम्।
अक्षरं परमं सूक्ष्मं महार्थं परमं प्रभुम् ॥
महामुद्रा स्थिता नाभौ ज्वलद्दीपशिखाकरा।
आदिस्वरस्वभावा सा धीति बुद्धैः प्रकीर्तितेति ॥
सकलबुद्धगुणदायकत्वान्महार्थः। अत एव परमाक्षर उत्पादनिरोधरहितः।

(अ० क०, पृ० 207)

अक्षोभ्यः

स च मणिवरटकावस्थितो निस्पन्दावस्थिताऽक्षोभ्यः, सकलतथागतवज्रकायत्वेन च्यवनदुःखाभावात्। (अ० क०, पृ० 204-205)

महाद्वेषो अक्षोभ्यः। (अ० क०, पृ० 209)

अग्रपुद्गलः

महासुखात्मकज्ञानकायत्वाद् अग्रपुद्गलः। (अ० क०, पृ० 321)

अचलः

विकल्पवायूपरमादचलः। (अ० क०, पृ० 247)

अज्ञानम्

अज्ञानमविद्यावासना। (अ० क०, पृ० 188)

अथ

अथेति अकारेणात्र नैरात्म्यप्रतिपादकत्वेन सर्वाकारवरोपेता शून्यता प्रोक्ता। थकारेणाप्यक्षोभ्यस्वभावप्रतिपादनेन निरालम्बकरुणा। ....तयोरद्वैधाद् मणिवरटकान्तःस्थितसहजानन्दशुक्रमेव शब्दाभिधेयमथेत्युच्यते। (अ० क०, पृ० 178)

अद्वयम्

अद्वयं शून्यताकरुणाभिन्नप्रज्ञोपायाद्वयं समाधिसम्भूतं महासुखस्वरूपं मन्त्रनीतौ। पारमितानये तु आत्मात्मीयग्राह्यग्राहकादिसकलमनोविस्पन्दरहितं सर्वधर्मनैरात्म्यस्वरूपस्वाभाविककायात्मकचित्तम्। (अ० क०, पृ० 200)

अद्वयवादी

अद्वयः सुखशुक्राद्वैधरूपः, तद्रूपप्रकाशनादद्वयवादी। (अ० क०, पृ० 236)

अनक्षरः

अच्युतकरुणारसपूर्णत्वादनक्षरः। (अ० क०, पृ० 262)

अविद्यमानवाच्यवाचकसम्बन्धेन धर्मधातुपरमाक्षरयोगात्मा अनक्षरः। (अ० क०, पृ० 313)

परमार्थरूपत्वादनक्षरः। (अ० क०, पृ० 314)

अनङ्गकायः

चूडामणिचक्रगतत्वेनानङ्गकायो धर्मधातुर्वज्रानङ्गः। (अ० क०, पृ० 312)

अनागामी

अनागामी क्लेशावशादसंसारित्वात्। (अ० क०, पृ० 239)

अनादिनिधनः

धर्मधातुज्ञानरूपत्वेन न विद्येते आदिनिधने उत्पादनिरोधौ विरमच्युतिक्षणौ यस्य स तथा। (अ० क०, पृ० 287)

अनादिः

अनादिराद्युत्पन्नो निष्प्रपञ्चः सर्वासत्संकल्पवर्जितः। (अ० क०, पृ० 235)

अनुत्तरः

चतुर्थाभिसम्बोधिरूपत्वादनुत्तरः। (अ० क०, पृ० 313)

अनुस्मृतिः

अनुस्मृतिर्नाम स्वेष्टदेवतादर्शनं प्रतिबिम्बाकारं विकल्परहितं तस्मादनेकरश्मिस्फुरद्रूपाकारं प्रभामण्डलम्। ततोऽनेकाकारस्फुरद्रूपां(पं) त्रैधातुकं स्म(स्फ)रणमित्यनुस्मृत्यङ्गमुच्यते।

(डाकिनीजालसंवररहस्य, पृ० 6)

अपराजितः

सर्वकायवाक्चित्तैक्येनाच्युतबोधिचित्तत्वेन परैर्विकल्पोर्मिभिर्न जीयत इत्यपराजितः।

(अ० क०, पृ० 288)

अप्रतिष्ठितनिर्वाणम्

विरमानन्दः संसारत्वात् प्रतिष्ठितः। मण्यग्रात् पतनान्निर्वाणम्, तद्भावान्न विद्यते प्रतिष्ठितं च निर्वाणं च यस्य स तथा। (अ० क०, पृ० 263)

अभवोद्भवः

शून्यतासम्भूतचतुःकायत्वादभवोद्भवः। (अ० क०, पृ० 330)

अभिषेकः

कुम्भो गुह्याभिषेकश्च प्रज्ञाज्ञानाभिधानकः।
पुनरेव महाप्रज्ञा तस्या ज्ञानाभिधानकः॥

कुम्भशब्देन स्तनौ उच्येते। तयोः स्पर्शनाद् यत् क्षरं क्षरसुखम्, स कलशाभिषेकः। गुह्यवज्रप्रवेशाद् यत् क्षरसुखं स गुह्याभिषेकः। पद्मे वज्रस्फारणाद् यत् क्षरसुखं स प्रज्ञाभिषेकः। महामुद्रानुरागेण यदक्षरं सुखं चतुर्थं तत्पुनस्तथाभिषेकः संवरसिद्धये सन्ध्याभाषया चोक्तो भगवता। (डा० जा० सं० र०, पृ० 1)

अभिसमयः

अभिसमयः प्रभास्वरनिराभासज्ञानसाक्षात्कारः। (अ० क०, पृ० 331)

अमरेन्द्रः

नैरात्म्ये ऐरावतगतित्वेन पुरन्दरस्वभावत्वादमरेन्द्रः। (अ० क०, पृ० 318)

अमिताभः

प्रज्ञाज्ञानमेव मूर्तिः शरीरं यस्य स हृदि स्थितोऽमिताभः। (अ० क०, पृ० 205)

अमोघगतिः

अमोघाऽव्याहता गतिर्यस्य सोऽमोघगतिः। निरन्तराव्याहतमहासुखशुक्रगत्यागतिस्वरूप इत्यर्थः। (अ० क०, पृ० 237)

अमोघपाशः

अमोघोऽवन्ध्यः पाश इव पाशः षडङ्गयोगलक्षणे यस्य स तथा, बोधिचित्तवज्रविनेयानां सत्त्वानां बिम्बदर्शनेन तथताप्रतिभासकत्वात् । (अ० क०, पृ० 252)

अमोघसिद्धिः

वाचा(चां) स्वरव्यञ्जनात्मिकानामीश्वरोऽनाहतस्वभावोऽमोघसिद्धिरूर्णाचक्रवर्ती ।

(अ० क०, पृ० 205)

अमोघः

अमोघमवन्ध्यमव्याहतसुखं जगदर्थम् । (अ० क०, पृ० 331)

अमोघोऽवन्ध्यः । (अ० क०, पृ० 252)

अर्हन्

सम्यक्समाधिवशात् सकलविकल्पक्लेशानरीन् हतवान् (इत्यर्हन्) । (अ० क०, पृ० 240)

अविद्या

अविद्या संसारवासना । (अ० क०, पृ० 267)

आगमः

महासुखत्वेनागमादागमः । (अ० क०, पृ० 331)

आत्मवित्

सर्वप्रपञ्चातिक्रान्तत्वेन गगनरूपत्वाद् आत्मवित् । (अ० क०, पृ० 321)

आत्मा

आत्मा निरालम्बस्वभावमचित्तचित्तम् । (अ० क०, पृ० 235)

आदिबुद्धः

सांक्लेशिकवैयवदानिकधर्माणां परमार्थतोऽभावेनाकारो निषेधार्थः । तेनादिबुद्धः । एकक्षण-पञ्चाकार-विंशत्याकार-मायाजालाभिसम्बोधिलक्षणं सुखम् आदिबुद्ध इत्यर्थः ।

(अ० क०, पृ० 287)

आनन्दः

निर्विकल्पमहासौख्य आकाङ्क्षालक्षणार्थकः ।
आनन्दोऽसौ सुखागारद्वारदेहलिकोपमः ॥
अहो सौख्यं महासौख्यं अहो भुञ्जे कथं कथम् ।
इत्याकाङ्क्षापरं चित्तं स आनन्दोऽग्रणीरिव ॥ (अ० क०, पृ० 210)

आनन्दचतुष्टयम्

भगवता एकस्मिन्नेव वज्रदेहे एकत्रैवानन्दे आनन्दाश्चत्वार उपदर्शिताः। तत्र कायानन्द-वागानन्द-चित्तानन्द-ज्ञानानन्दभेदेनेति। (डा॰ जा॰ सं॰ र॰, पृ॰ 2)

अ इ उ इति त्रयं कायवाक्चित्ताद्वयत्वेन आनन्दः। आ ई ऊ इति द्विरूपतया परमानन्दः। ए ओ अं इति त्रयं उभयस्वरात्मकं त्रिवज्रं विरमानन्दः। ऐ औ अः इति त्रयं वज्राभिन्नं चतुर्थः सहजानन्दः। एतेन चतुरानन्दस्वभावो भगवाननुत्पादरूपो व्याख्यातः।

(अ॰ क॰, पृ॰ 204)

आवरणम्

तथा चोक्तमार्यवसुबन्धुपादैः—

"..............त्रीण्यावरणानि—कुशलानुत्पादः, अपरिपूर्णसम्भारता, अमनसिकारता च। तथा सद्धर्मे अगोचरम्, लाभसत्कारपूजायां गौरवम्, सर्वेषु अकारुण्यं चेति"।

पुनश्चोक्तम्—"अप्रतिष्ठितनिर्वाणमप्यावरणं बोधिसत्त्वगोत्राणाम्" इति। तथा मोक्षाभिलाशो-(षो)ऽपि बोधिसत्त्वानामावरणमिति विस्तरः। (डा॰ जा॰ सं॰ र॰, पृ॰ 8)

उपेक्षा

उपेक्षा इत्यशेषकल्पनाकलङ्कापगमनात्। (डा॰ जा॰ सं॰ र॰, पृ॰ 1)

एकक्षणः

एकोऽद्वितीयः क्षणस्तुर्यातीतश्चतुरानन्दैकमूर्तिः सहजसम्बोधिलक्षणः। (अ॰ क॰, पृ॰ 297)

कङ्कालः

कं सुखं कलयतीति कङ्कालः। (अ॰ क॰, पृ॰ 255)

कमलम्

कमलं रजःशुक्रयोगेन सितरक्तगुणयुतं स्त्रीपद्मम्। (अ॰ क॰, पृ॰ 184)

करुणा

गुह्ये वज्रप्रवेशात् ततः समधिकतया करुणा। (डा॰ जा॰ सं॰ र॰, पृ॰ 1)

कामः

कामो महारागः। स एव वज्रसत्त्वो महासत्त्वः परमाक्षरसुख इति।

(डा॰ जा॰ सं॰ र॰, पृ॰ 4)

कायः

यत्कायं सर्वबुद्धानां निराभासं निरञ्जनम्।
अज्ञातमकृतं शुद्धमभावादिविवर्जितम्॥ (अ॰ क॰, पृ॰ 205)

कुलत्रयम्

कुलत्रयमिति कायवाक्चित्तचक्रम्, तेन नाभिचक्रे स्थितो वज्ररूपस्वभावो वैरोचनः। कर्णिकानाडीगतः पिता कायस्य बीजबिन्दुः। (अ० क०, पृ० 197)

कुलत्रयं कायवाक्चित्तानन्दपरमानन्दविरमानन्दरूपं यस्य स तथा। (अ० क०, पृ० 313)

कुलम्

कुलमद्वयत्वात्। (अ० क०, पृ० 197)

कुलिशेशः

कुलिशे वज्ररन्ध्रद्वयाभ्यन्तरे ओडियाने जालन्धरसंज्ञके महासुखस्वभावेन ईश्वरत्वात्। (अ० क०, पृ० 255)

कुलिशेश्वरः

कुलिशे वज्रशिखरपुरे स्थिरत्वेन ईश्वरत्वात् कुलिशेश्वरः। (अ० क०, पृ० 184)

कैवल्यज्ञानम्

कैवल्यज्ञानं शुद्धाद्वयधर्मतालक्षणं धर्मकायात्मकम्। (अ० क०, पृ० 242)

क्रोधराट्

क्रोधराट् विरमानन्दादनन्तरं राजत इति क्रोधराट्, महासुखस्वभावो मञ्जुश्रीरूपः। (अ० क०, पृ० 254)

क्रोधः

क्रोधेन सर्वधर्मशून्यतास्फुटीभावेन, क्रोधे विरमपर्यन्ते वा, "क्रोधो विरमपर्यन्तः" इति पीठविवृतिः। (अ० क०, पृ० 187)

क्लेशधातुः (अष्टादश)

क्लेशधातवोऽष्टादश अस्थि-चर्म-मांस-रक्त-स्नायु-मज्जा-मेदः-शुक्र-श्लेष्म-विट्-मूत्र-खेट-सिंहा-(घा)ण-यकृत्-प्लीहा-पिशित-मल-रोमाख्याः। (अ० क०, पृ० 310)

क्लेशः

क्लेशः च्युतिदुःखम्। (अ० क०, पृ० 188)

क्षितिगर्भः

क्षितिशब्देन पञ्चभूतोपलक्षणात् क्षितिगर्भो हेतुः, क्षितिगर्भः सहजानन्दबिन्दुः। (अ० क०, पृ० 296)

क्षीणास्रवः

बोधिचित्तप्रयोगेण तदुत्पादितदृष्टान्तदार्ष्टान्तिकावाच्यतत्त्वसुखत्वेन सकलपरिसमाप्तार्थत्वात् सद्गुरूपदेशवशेन चतुर्थाभिषेकक्षणे तुर्यक्षणातीतत्वेन शिष्यस्य तत्क्षणात् एवातीवश्रद्धायोगेन सकलविद्याप्रहाणात् क्षीणा आस्रवा यस्य यतो वा स तथा। (अ० क०, पृ० 240)

क्षेत्रम्

परिशुद्धनाडीचक्रात्मकत्वात् क्षेत्रम्। (अ० क०, पृ० 332)

गगनोद्भवः

स्वयम्भूरूपत्वाद् गगनोद्भवः। (अ० क०, पृ० 330)

गणपतिः

गणो मायोपमार्थरूपः, तथागतविद्याप्रभृतयो वा, तेषां पतिर्गणपतिः स्वामी, बोधिचित्त-स्वभावत्वात्। (अ० क०, पृ० 238)

गणाचार्यः

गणानामानन्दपरमानन्दविरमानन्दानां आचार्यः सहजरूपोपदर्शकः। (अ० क०, पृ० 238)

गणेशः

गणानां पञ्चस्कन्धादीनां सहजरूपताऽऽपादनेन परमेश्वरत्वाद् गणेशः। (अ० क०, पृ० 238)

गोष्पतिः

गीर्ध्वनिः षडक्षरात्मक एकार आधारात्मकः, तस्य पतिः षष्ठो वंकारो वज्रधर आधेय-स्वभावः। तथा च वक्ष्यति—

पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षर इति।

एकार-वंकाररूप इत्यर्थः। (अ० क०, पृ० 189)

गुह्यधृक्

गुह्यं परमाक्षरचतुर्थबिन्दुः, तद्धरतीति यथा। (अ० क०, पृ० 192)

गुह्यराट्

गुह्यं श्रावक-प्रत्येकबुद्धयानयोरुत्तरं वज्रयानं कायवाक्चित्तज्ञानैकलोलीभावो वा, तत्र महासुखरूपतया राजत इति गुह्यराट्। पञ्चगुह्यराजत्वाद् वा गुह्यराट्।

(अ० क०, पृ० 183)

गुह्येन्द्रः

गुह्येन्द्रः कायवाक्चित्तैश्वर्यलाभी। (अ० क०, पृ० 192)

गौतमः

परमाक्षरसुखत्वादेव गौतमः शाक्यमुनिः सिद्धार्थः । (अ० क०, पृ०, 283)

चक्रवर्ती

महासुखशुक्ररूपतया षट्चक्रेषु वर्तितुं शीलमस्य स चक्रवर्ती । (अ० क०, पृ० 238)

चतुर्मुद्रा

कर्ममुद्रा-महामुद्रा-ज्ञानमुद्रा-समयमुद्रा..........उक्तं च चतुर्मुद्रोपदेशे तद्यथा—

कर्मज्ञानमहामुद्रासमयाख्यः प्रभास्वरः ।
हेतुर्भाव्या तथा प्राप्य चतुर्थोऽविनश्वरः ॥

हेतुरिति प्रथमं कर्ममुद्रोद्भूतं यत्सहजमच्युतसुखम् । उक्तं च भगवता—तत्सत्यमेव, किन्तु संवृत्या लौकिकदृष्टान्तेनादर्शमिव न परमार्थतः । तस्मात्तीक्ष्णेन्द्रियेण न ग्राह्या कर्ममुद्रा । कर्ममुद्रा च स्तनकेशवती कामधातुसुखस्य हेतुः । कर्म चुम्बनालिङ्गनगुह्यस्पर्शवज्रस्फालनादि-व्यापारात्मकम्, तेनोपलक्षिता मुद्रा प्रत्ययकारिणी । प्रत्ययोऽत्र क्षरसुखलक्षणः । मुदं सुखविशेषं राति ददातीति मुद्रा भाव्या । ज्ञानमुद्रा, सा च स्वचित्तपरिकल्पिता विश्वमात्र-(ता) देवीस्वभावा पूर्वानुभूता रूपधातुसुखस्य हेतुः । ज्ञानं पूर्वहसितरमितादिभावनालक्षणम्, ऽत्ययोऽत्र स्पन्दसुखलक्षणः । स्कन्धधात्वायतनादिदेवताकारेण विशोध्य मण्डलचक्रस्वभावं यथा विधिना स्फुटीकृत्य मन्थमन्थानयोगेन ज्ञानवह्निं प्रज्वाल्य यावद् दग्धेऽहं स्रवते शशी ललाटकण्ठहृन्नाभिवज्रकमलकर्णिकाग्रतः । बोधिचित्तरूपेण विषयेन्द्रियसमस्तमहासुखसाग-रस्य यदेकलोलीभूततन्मयसमाधिमापन्नो भूत्वा तिष्ठेत्, यावत् श्रीमहामुद्राऽभिमुखी भवतीति प्राप्या । महामुद्रा स्वप्नेन्द्रजालमनोमयसदृशी । महती चासौ (मुद्रा) महामुद्रा चेति कृत्वा । महत्त्वं पुनरस्याः सर्वाकारवरोपेतत्वं न प्रादेशिकत्वम्, मुद्र्यतेऽनेनेति बोधिचित्तवज्रेण मुद्रा । प्रत्ययोऽत्र स्वचित्तपरिकल्पनाधर्मरहितो धूमादिनिमित्तपूर्वकः स्वचित्तप्रतिभासो योगिगम्यः प्रतिसेनावदिति । तामालिङ्ग्य यावत्समयमुद्रा साक्षात् क्रियते । अविनश्वरा परमाक्षर-स्वरूपिणी सा च फलरूपमहामुद्रा ।

मुदं परमाक्षरसुखलक्षणं राति सर्वकालमादत्ते पूर्णावस्थायामचलयोगेनेति मुद्रा ।..............
कायवाक्चित्तज्ञानविशुद्ध्या मुद्राचतुष्टयमुक्तम् । श्री आदिबुद्धे चोक्तम्—

क्षरः क्षरः (क्षरोऽक्षरः) ततः स्पन्दो निस्पन्दो विमलोऽपरः ।

[1]अब्जे वज्रप्रवेशः शिखिनि च मरुतो बिन्दुपातस्तृतीयः,
एतद्योगत्रयस्य प्रकटितनियता कायवाक्चित्तमुद्रा।
रागारागान्तकाद्या परमसुखनिधिर्योगगम्या चतुर्थी
मुद्राणां सैव माता भवति सुफलदा श्रीगुरोर्वक्त्रमेषा।

उक्तं च वैरोचनाभिसम्बोधितन्त्रे—

कर्ममुद्रां समासाद्य धर्ममुद्रां विभावयेत्।
तत्र (अत) ऊर्ध्वे महामुद्रा तस्याः समयसम्भवः॥

अन्यत्र च—

तां मोक्षलक्ष्मीमविनष्टसौख्यीं(ख्यां) त्यक्त्वा शुभां भगवतीं युवतिं रमन्ते।
प्रायेण पूर्वार्ज्जितमुग्रकर्म येनामृतं त्यज्य विषं पिबन्तीति॥

श्री आदिबुद्धे च—

[2]एता मुद्राश्चतस्रोऽक्षरसुखफलदा योगिना भावनीयाः,
सर्वस्मिन् सर्वकालं सुरतरतिगतैर्लोकमार्गप्रयुक्तैः।
ग्रामारण्येऽथ श्मशानेऽशुचिशुचिनिलये वेश्मदेवालये च,
वर्णावर्णाभियुक्तैस्तनुबलसुखदैरन्नपानादियुक्तैः ॥

(अ० क०, पृ० 322-326)

चतुःस्मृतिसमाधिराट्

हसितेक्षणपाण्यावाप्तिद्वन्द्वचतुःसमाधिराजनाच्चतुःस्मृतिसमाधिराट्। (अ० क०, पृ० 303)

चत्वारि पीठानि

चतुष्पीठे चोक्तम्—
"मन्त्रादात्मपीठम्, आत्मपीठात्परपीठम्, परपीठात्तत्त्वपीठम्"। (डा० जा० सं० र०, पृ० 4)

चत्वारिंशत् क्षणाः

रागो रक्तं तुष्टं मध्यमतुष्टमतितुष्टं हर्षणं प्रामोद्यं विस्मयो हसितमाह्लादनमालिङ्गनं चूषणं (स्थैर्यं) वीर्यं मानः करणं हरणं बलमुत्साहः साहसं मध्यमसाहसमुत्तमसाहसं रौद्रं विलासो वैरं शुभं वाक्स्फुटं सत्यम् असत्यं निश्चयो निरुपादनं दाहत्वं चोदनं शौर्यम् अलज्जा धूर्तत्वं दुष्टत्वं शठकौटिल्यमिति चत्वारिंशत् क्षणा उपायज्ञानस्य। (अ० क०, पृ० 310)

---

1. का० त०, 3.126
2. का० त०, 5.54

चित्तवज्रम्

द्विविधं चित्तवज्रं तु पिण्डचित्तं प्रकाशं चेति ।
पिण्डचित्तं कर्ममुद्राध्यानम्, प्रकाशं महामुद्रेति ॥ (डा० जा० सं० र०, पृ० 2)

चित्तस्यैकाग्रता

चित्तस्यैकाग्रता नाम बिम्बेन सह चित्तस्यैकीकरणमिति । (डा० जा० सं० र० पृ० 6)

जगद्गुरुः

जगतां श्वासवातानां कायवाक्चित्तानां वा गुरुस्तत्त्वोपदेष्टा । (अ० क०, पृ० 188)

सर्वप्रपञ्चोपशमेनाविचलितसुखज्ञानविहारत्वाज्जगद्गुरुः । (अ० क०, पृ० 319)

जितारिः

अविद्यादिद्वादशाङ्गनिरोधनाज्जितारिः । (अ० क०, पृ० 237)

जितेन्द्रियः

उष्णीषमणिशिखराश्रितत्वेन सर्वेन्द्रियविषयानभिभवनीयत्वाद् द्वीन्द्रियसंयोगानुत्पन्नत्वाद् वा । (अ० क०, पृ० 241)

जिनजिक्

जिनान् अक्षोभ्यादीन् जनयतीति नैरुक्त्या जिनजिग् विमलनिराभासचित्तावबोधरूप इत्यर्थः। (अ० क०, पृ० 294)

जिनः

रागविरागमध्यरागविजयित्वाज्जिनः । (अ० क०, पृ० 237)

ज्ञानसंभवः

तुर्यातीतास्तिनास्तिव्यतिक्रान्तस्वसंवेद्यत्वाद् ज्ञानसंभवः । (अ० क०, पृ० 330)

तत्त्वः

भावाभावैकरूपतत्वयोगात्तत्त्वः । (अ० क०, पृ० 303)

तथता

तथता वामदक्षिणवाहभङ्गेनावधूतीवाहः । उक्तं च--

नाडिकादिस्वभावेन देवतातत्त्वयोगतः ।
तासामेतत्परं शुद्धं स्वरूपं निःस्वभावता ॥
यत्प्रज्ञोपाययोरैक्यं सर्वाकारैकसंवरम् ।
सावधूती विधूतात्मा मध्यमा प्रतिपन्मता ॥
आदिमध्यान्तसंकल्पसम्बन्धानवधानतः ।
शुद्धः स्फटिकसंकाशः प्रकाशः सोऽवधूतिकः ॥ (अ० क०, पृ० 26 ।)

तथतात्मा

महासुखशुक्रलिप्ततया तथतात्मा। (अ० क०, पृ० 235)

तथागतः

तथा सहजसुखाकारेणोष्णीषकर्णिकातो वज्रमणिवरटके आगतं विवृत्या मणिवरटकात् पुनरुष्णीषचक्रगतं तथागतम्। उक्तं च—

आगतश्च गतश्चैव व्याप्य विश्वं व्यवस्थितः।
गत्यागतिनिरोधाश्च(च्च) तथागत इति स्मृतः॥ (अ० क०, पृ० 187)

तथा तथता कर्मादिमुद्रा, तत्र गतमानन्दादिसुखज्ञानं यस्य स तथागतः।

(अ० क०, पृ० 288)

तथता धर्मादया अवधूती, तद्गतत्वेन सर्वगुणोदयाद्दशविधप्राणादिवायुनिरोधेन दशभूमिसमन्तप्रभापर्यन्तफलभूमिप्राप्तस्तथागतः।

यथैवागतो वज्रमणिवरटकम्, तथैव उष्णीषचक्रं गतस्तथागतः। (अ० क०, पृ० 237)

त्रयस्त्रिंशत् क्षणाः

प्रकृतयो विरागो मध्यविरागोऽतिविरागो यन्मनोगतागतम्। शोको मध्यशोकोऽतिशोकः। सौम्यविकल्पो भीतं मध्यमभीतमतिभीतम्। तृष्णा मध्यतृष्णा अतितृष्णा उपादानं निःशुभ्रं क्षुत्तृष्णावेदना समवेदना अतिवेदना। विदविद् धारणापदं प्रत्यवेक्षणं लज्जा कारुण्यं स्नेहो मध्यस्नेहोऽतिस्नेहश्चकितं सञ्चयो मात्सर्यमिति त्रयस्त्रिंशत् क्षणाः प्रज्ञाज्ञानस्य।

त्रिकायधृक्

सहजान्तर्वर्तिकायवाक्चित्तत्वात् त्रिकायधृक्। (अ० क०, पृ० 247)

त्रिलोकम्

त्रयोलोकास्त्रिलोकम्, कायवाक्चित्तम्। (अ० क०, पृ० 182)

त्रिलोकं कायवाक्चित्तलक्षणम्। (अ० क०, पृ० 195)

त्रैलोक्यं कायत्रयम्। (अ० क०, पृ० 264)

त्रैविद्यः

तिस्रो विद्याः कामावचररूपावचरमहामुद्रासिद्धिसाधिका यस्य स एव त्रैविद्यः।

(अ० क०, पृ० 320)

दर्पः

अतिमानो दर्पः। (अ० क०, पृ० 333)

दर्शनम्

दर्शनमिति चुम्बनमालिङ्गनम्। (डा० जा० सं० र०, पृ० 2)

दशकामावस्थाः

दशकामावस्थाश्च दशधूमादिनिमित्तानि प्रत्याहाराङ्गरूपाणि । तथा चोक्तं श्रीकालचक्रे[1]—

चिन्ताकाङ्क्षाज्वरोऽङ्गे वरमुखकमले शुक्तिरन्या प्रवृत्तिः,
कम्पोन्मादश्च घूर्मा प्रभवति मनसो विभ्रमस्तीव्रमूर्च्छा ।
धूमाद्या वज्रिणस्ता प्रकटदशविधाः प्राणिनोऽङ्गेष्ववस्था,
लोके ता मन्मथस्य प्रकटितनियताः को जिनः कश्च कामः ॥

(अ० क०, पृ० 217)

दशधातवः

वायुश्चित्तं बोधिचित्तं रक्तं मज्जा अस्थीनि स्नायुर्मांसमिन्द्रियाणि चर्म चेति ।

(अ० क०, पृ० 224)

दशबलबलिता

दशविधधूमादिनिमित्तबलयोगाद् दशबलबलिता । (अ० क०, पृ० 331)

दशभूमीश्वरः

दशानां भूमीनां प्रमुदितादीनां चतुर्विंशतिपीठोपपीठादिलक्षणानामीश्वरः प्रधानं सहजज्ञानाकारेण व्यापकत्वात् । अस्यायमर्थः—

दानात् प्रमुदितो योगी शीलवान् विमलो भवेत् ।
क्षान्त्या प्रभाकरी वीर्यादर्चिष्मान् पुण्यवानसौ ॥
ध्यानादभिमुखाकृष्टः प्रज्ञया तु सुदुर्जयः ।
दूरङ्गमो महोपायो बलवानचलो भवेत् ॥
साधु[श्च] प्रणिधानेन धर्ममेघस्तु ज्ञानवान् ।
जिनस्तथागतः प्रत्यात्मवेद्य एकादशो भवेत् ॥ (अ० क०, पृ० 222-223)

दंष्ट्राकरालः

दंष्ट्रा चण्डाली तस्या गुरूपदेशाज्ज्वलितायाः शिखरभूतत्वाद् दंष्ट्राकरालः ।

(अ० क०, पृ० 254)

दानवाधिपः

अनुपमाद्वयश्रीधर्मामृतलाभेन राहुस्वभावत्वाद् दानवाधिपः । (अ० क०, पृ० 318)

देवातिदेवः

महारागात्मककायत्वेन ब्रह्मात्मकत्वाद् देवातिदेवः । (अ० क०, पृ० 318)

---

1. का० त० ४।१२६

देवेन्द्रः

प्रभास्वरचित्तवज्रत्वेन विष्णुस्वभावत्वाद् देवेन्द्रः । (अ० क०, पृ० 318)

द्वादशभूमयः

ताश्च भूमयः समन्तप्रभा-अमितप्रभा-गगनप्रभा-वज्रप्रभा-रत्नप्रभा-पद्मप्रभा-कर्मप्रभा-अनुपमा-निरुपमा-प्रज्ञाप्रभा-सर्वज्ञता-प्रत्यात्मवेद्याख्याः । (अ० क०, पृ० 204)

द्वादशाकारसत्यार्थः

निःस्प(ष्य)न्दविपाकपुरुष(षा)कारवैमल्यक्षणानां प्रत्येकं त्रैगुण्याद् द्वादशाकाराद् द्वादशभूमयः संवृतिपरमार्थसत्याभेदेन तद्योगाद् द्वादशाकारसत्यार्थः । तत्र कायवाक्चित्तविवेकनिःस्प-(ष्य)न्दभेदेन प्रथमं त्रिकं निर्माणकायस्य । भास-प्रतिभास-प्रकृतिनिराभासविपाकभेदेन द्वितीयं त्रिकं संभोगकायस्य । चित्तचैतसिकाविद्यापुरुष(षा)कार(वैमल्यविपाक)भेदेन तृतीयं त्रिकं धर्मकायस्य । आनन्दद्वयविरमसहजानन्दवैमल्यभेदेन चतुर्थत्रिकं ज्ञानकायस्येति । प्राणक्षयेण रजोनिरोधाद्वा निरोधितमेषवृषादिद्वादशराशित्वेन वा द्वादशभूमिलाभाद् द्वादशा-कारसत्यार्थः । (अ० क०, पृ० 308)

द्विपदोत्तमः

संवृतिपरमार्थज्ञानद्वयेन द्विपदेनोत्तमः श्रेष्ठो द्विपदोत्तमः । अथवा द्विपदेन वज्रमणिशिखरो-ष्णीषाप्रतिष्ठाद्वयेन उत्तमो द्वादशभूमीश्वरः । यथोक्तं विमलप्रभायाम्—

एकं पदं वज्रमणौ रजोऽर्के उष्णीषशुक्रे शशिनि द्वितीयम् ।
न्यस्तं सदोच्छेद्यमभेद्यमिष्टं भर्तुस्त्रिलोकमहितं शिरसा प्रणम्य ॥

(अ० क०, पृ० 194)

धर्मगण्डी

सकलसुखमयवाग्वज्रसमाधिविस्फारितसर्वधर्मप्रकाशकधर्मज्योति(ती)रूपत्वाद् धर्मगण्डी ।
(अ० क०, पृ० 262)

धर्मधातुः

कायत्रयात्मकमहासुखैकरूपत्वाद् धर्मधातुः । (अ० क०, पृ० 244)

धर्मयोनिः

सर्वसत्त्वानामुत्पत्तिस्थानत्वाद् ज्ञानकायत्वाद् धर्मयोनिः । (अ० क०, पृ० 248)

धर्मराट्

धर्मो धर्मधातुः स्वाधिष्ठानम्, तत्र तेन वा राजत इति धर्मराट्, सहजज्ञानालोकरूपत्वात् ।
(अ० क०, पृ० 244)

धर्मराजः

धर्मेण महासुखवर्षेण लोकान् रञ्जयतीति धर्मराजः। (अ० क०, पृ० 244)

धर्मेश्वरः

धर्मेण सहजानन्दचतुष्टयेन ईश्वरस्त्रिलोकस्वामी, नित्यं बोधिचित्तरसास्वादनैश्वर्यात्।
(अ० क०, पृ० 244)

धातुः

सर्वधर्मप्रकृतिकत्वाद्धातुः। (अ० क०, पृ० 244)

धारणा

धारणा नाम प्राणस्य माहेन्द्रवारुणाग्निवायुमण्डला(ले) नाभौ कृतिश्चैव (हृदि कण्ठे) ललाटे प्रवेशः। न बाह्यनिर्गमः। बिन्दौ प्राणप्रवेशनमिति धारणाङ्गमुच्यते। (डा० जा०सं०र०, पृ० 6)

ध्यानम्

चतुरानन्दैकत्वाद् ध्यानम्। (अ० क०, पृ० 246)

प्रज्ञादिपञ्चविधध्यानरूपत्वाद् ध्यानम्। (अ० क०, पृ० 332)

ध्यानं नाम शून्येषु सर्वभावेषु चित्तप्रवृत्तिः (डा० जा० सं० र०, पृ० 5)

नाथः

नाथमच्युतबोधिचित्तम्। (अ० क०, पृ० 187)

नाथः समाध्यनुगमात्। सकलसत्त्वानामनाभोगेनाधिष्ठानात्। (अ० क०, पृ० 224)

अद्वययोगेन सुस्थितत्वान्नाथः। (अ० क०, पृ० 266)

नामसंगीतिः

नानातन्त्रोपलक्षितमहासुखाकारसहजानन्दसुखस्य नाम्ना सम्यग्ज्ञानं(गानं) नामसंगीतिः।
(अ० क०, पृ० 190)

निराकारः

कल्पनापोढाभ्रान्तप्रत्यक्षदर्शनान्निराकारः परमाणुधर्मतातीतः कल्पनारहितत्वात् पिहितापिहितनेत्रगम्यः। (अ० क०, पृ० 316)

निराभोगः

अनाभोगेन पञ्चकामोपभोगसुखत्वान्निर्गत आभोगो विकल्पप्रवृत्तिरस्य स तथा।

उक्तं च—

"पूर्णप्रणिधानाहितसततानाभोगवाहि परकार्यम्" इति। (अ० क०, पृ० 287)

निर्माणकायः

अनाभोगबहिर्जगदर्थनानाप्रकृतिको निर्माणकायः। (अ० क०, पृ० 318)

निर्वाणम्

भावाभावपरामर्शशून्यत्वान्निर्वाणम् । (अ॰ क॰, पृ॰ 285)

निर्विकल्पः

परमार्थज्ञानविकल्पस्याप्यभावान्निर्विकल्पः । उक्तं च—

[1]परमार्थविकल्पेऽपि नावलीयेत पण्डितः ।
को हि भेदो विकल्पस्य शुभे वाप्यशुभेऽपि वा ॥ (अ॰ क॰, पृ॰ 287)

नैरात्म्यम्

नैरात्म्यं सर्वधर्माणां निराभासलक्षणं विश्वबिम्बरूपम् । (अ॰ क॰, पृ॰ 237)

पञ्चकायात्मकः

जाग्रत्-स्वप्न-सुषुप्त(प्ति)-तुरीय-तुरीयातीतत्वेन पञ्चकायात्मकः । (अ॰ क॰, पृ॰ 247)

पञ्चचक्षुः

प्रत्याहारध्यानप्राणायामधारणानुस्मृत्यङ्गस्फुटीभावात् पञ्चचक्षुः । (अ॰ क॰, पृ॰ 248)

पञ्चज्ञानात्मकः

पञ्चकुलात्मकत्वेन आदर्शादिज्ञानात्मकत्वात् पञ्चज्ञानात्मकः । उक्तं च—

[2]बोलककोलयोगेन स्पर्शात् काठिन्यवासना ।
कठिनस्य मोहधर्मत्वाद् मोहो वैरोचनो मतः ॥
बोधिचित्तं द्रवं यस्माद् द्रवमब्धातुकं मतम् ।
अपामक्षोभ्यरूपत्वाद् द्वेषोऽक्षोभ्यनायकः ॥
द्वयोर्घर्षणसंयोगात् तेजः संजायते सदा ।
रागोऽमितवज्रः स्याद् रागस्तेजःसमुद्भवः ॥
कक्कोलहेतु यच्चित्तं तत् समीरणरूपकम् ।
ईर्ष्या अमोघसिद्धिः स्यादमोघो वायुसम्भवः ॥
सुखं रागं भवेद् रक्तं रक्तिराकाशलक्षणा ।
आकाशं पिशुनवज्रः स्यात् पिशुनमाकाशसम्भवः ॥ इति ।

अथवा मातापितृसंयोगे विपतुर्बोधिचित्तबीजेन चन्द्राक्षोभ्यद्रवत्वादर्शरूपता । मातुः स्वयम्भू-कुसुमेन सूर्यरत्नसम्भवरागत्वात् समता । पद्मे वज्रप्रवेशेन महारागबीजेनामिताभसुखत्वात्

1. आ॰ मा॰, पृ॰ 6
2. हे॰ त॰, 2. 2. 53-57.

प्रत्यवेक्षणा। चलनस्पन्दनानुभवामोघसिद्धिरूपत्वात् कृत्यानुष्ठानम्। अन्तराभवविज्ञानप्रवेशेन वर्धनम्, ततो वैरोचनो जननीगर्भान्निष्क्रमणं बिम्बनिष्पत्तिः सुविशुद्धधर्मधातुः।

(अ० क०, पृ०, 248)

पञ्चशिखा

आलोकालोकाभासालोकोपलब्धिप्रभास्वरधर्मधातुलक्षणः(णा) पञ्चशिखा।

(अ० क०, पृ० 247-282)

पञ्चाकारभावना

मूलतन्त्रपञ्चाकारज्ञानस्तवे पञ्चश्लोकैः पञ्चाकारभावना भगवतोक्ता। तद्यथा—

शून्यो भावसमूहोऽयं कल्पनारूपवर्जितः।
दृश्यते प्रतिसेनेव कुमार्या दर्पणे यथा॥

लोकोत्तरसत्यरूपस्कन्धः, आदर्शज्ञानम्।

सर्वभावसमो भूत्वा एको भावोऽक्षरः स्थितः।
अक्षरज्ञानसंभूतो नोच्छेदो न च शाश्वतः॥

वेदनास्कन्धः, समताज्ञानम्।

सर्वसंज्ञात्मका वर्णा अकारकुलसम्भवाः।
महाक्षरपदप्राप्ता न संज्ञा न च संज्ञिनः॥

संज्ञास्कन्धः, प्रत्यवेक्षणाज्ञानम्।

अनुत्पन्नेषु धर्मेषु संस्काररहितेषु च।
न बोधिर्नैव बुद्धत्वं न सत्त्वो नैव जीवितम्॥

संस्कारस्कन्धः, कृत्यानुष्ठानज्ञानम्।

विज्ञानधर्मतातीता ज्ञानशुद्धा ह्यनाविलाः।
प्रकृतिप्रभास्वरा धर्माः धर्मधातुर्गतिं गताः॥

विज्ञानस्कन्धः, सुविशुद्धधर्मधातुज्ञानम्। (अ० क०, पृ 328-329)

पञ्चाक्षरशून्यम्

ज्ञानस्कन्धविज्ञानस्कन्धज्ञानधात्वाकाशमनःश्रोत्रशब्दधर्मधातुदिव्येन्द्रियभगमूत्रस्रावशुक्रच्युतिरूपाणां निरावरणता प्रत्येकं स्वस्वविषयग्रहणविवर्जितत्वं समरसमेकलोलीभूतत्वं परमाक्षरशून्यं योगिस्वसंवेद्यम्, न सर्वाभावलक्षणम्। तदेवाह—तमाकारशून्यं रेखामात्रमनुच्चार्यं कर्तृकाकारं मध्ये, संस्कारस्कन्धवायुधातुघ्राणस्पर्शवागिन्द्रियविट्स्रावाणामेकलोलीभूतत्वं मध्यानाहतचिह्नात् पूर्वेण इकारशून्यं दण्डाकारं द्वितीयाक्षरशून्यम्। वेदनास्कन्धतेजोधातु-

चक्षूरसपाणिगतीनां निरावरणगतं मध्यानाहतचिह्नाद्दक्षिणेन लृकारशून्यं बिन्दुद्वयं तृतीयाक्षरशून्यम् । संज्ञास्कन्धतोयधातुजिह्वारूपादेन्द्रियादीनां निरावरणता मध्यानाहतचिह्नाद्वामेन बिन्दुरूपमेकमनुच्चार्यमूकारशून्यं चतुर्थाक्षरमहाशून्यम् । रूपस्कन्धपृथिवीधातुकायेन्द्रियगन्धपाटवालापानां समरसत्वमेकलोलीभूतत्वं मध्यानाहतचिह्नात् पश्चिमेन तद् हलाकृतिरेकारशून्यं पञ्चाक्षरशून्यम् । (अ० क०, पृ० 314-315)

पद्मनर्तेश्वरः

अवाच्यसुखबोधिचित्तत्वात् पद्मनर्तेश्वरः । (अ० क०, पृ० 291)

परमानन्दः

परमानन्दः सांक्लेशिकसुखभोगलक्षणत्वाद् भवः संसारः । ....

रागः परमानन्दः, आसक्तिलक्षणत्वात् । (अ० क०, पृ० 274)

भावेषु भावनारोपशून्यत्वेन विमर्दनात् ।
निःस्वभावत्वयोगात्मा परमानन्दरूपकम् ॥ (अ० क०, पृ० 211)

परवित्

स्वपरयोरद्वैतबोधात् परवित् । (अ० क०, पृ० 321)

पारमिताश्चतस्रः

उपाय-बल-प्रणिधि-ज्ञान-पारमिताश्चतस्रः । उक्तं च—"तस्याः सत्त्वार्थमृद्धिर्भवनिधनमजप्राप्तिरन्याश्चतस्रः" इति । अथ सत्त्वार्थमित्युपायः । ऋद्धिरिति प्रणिधिः । भवनिधनमिति बलम् । अजप्राप्तिरिति ज्ञानम् । (अ० क०, पृ० 216)

पारमिताः (दश)

उदकादिपूर्वकलोकोत्तराद्यभिषेकदानाद्दानम् । कमलकुलिशसंयोगे बोधिचित्तरक्षणात् शीलम् । न क्वचित् स्थिताः सर्वधर्मा इति सर्वधर्मनिर्विकल्पावगमक्षमणात् क्षान्तिः । महास्फुटीभावोद्योगाद् वीर्यम् । चतुर्थध्याननिमज्जनाद्ध्यानम् । प्रज्ञा दिव्यमुद्रा गुरुमुखैकलभ्या । उपायो हठयोगोऽपि समाध्यङ्गस्फुटीभावार्थम् ।............समाध्यङ्गस्फुटीभावेन एकक्षणाभिसम्बोधिक्षणोदये सर्वं स्वपरार्थनिष्पत्तिः प्रणिधिः । बलं महासुखसामर्थ्यम् । ज्ञानं मणिवरटकान्तःप्रवृत्तिविवृत्या उष्णीषचक्रपर्यन्तं महासुखज्ञानम् । (अ० क०, पृ० 221-222)

पीठानि

परपीठेति प्रज्ञोक्ता आत्मपीठमुपायकम् ।
अनयोरद्वयीभावो योगपीठ इति स्मृतम् ॥
तत्त्वपीठं तदुत्पन्नं तद्रहितं च यद् भवेत् ।
सहजेति समाख्यातं वाक्पथातीतगोचरम् ॥

अन्यत्र च—

[1]पीठं स्त्रीगुह्यपद्मं प्रभवति समये वज्रमेवोपपीठं
क्षेत्रं छन्दोहमेलापकचितिभुवनं तद्वदेवं समस्तम् ।
पीठं वामाङ्गपूर्वं ह्यपरमपि तथा दक्षिणं चोपपीठम्
एवं क्षेत्रादि सर्वं करचरणगताश्चाङ्गुलीर्जानुसीम्नः ॥ इति ।

(अ० क०, पृ० 308)

पुण्यम्

पुण्यं महाकरुणारागरञ्जिताचित्तचित्तेन समाध्यङ्गाभिमुखीकरणं सुखं (पुण्यम्) । उक्तं च—

न विरागात् परं पापं न पुण्यं सुखतः परम् ।
तस्मात् सर्वप्रयत्नेन च्युतिसौख्यं विवर्जयेत् ॥

(अ० क०, पृ० 245)

प्रजापतिः

ज्ञानप्रबोधेन तुर्यातीतप्रभास्वरमयज्ञानबिम्बमयत्वेन सर्वजन्तूनामुत्पादनात् प्रजानां जन्तूनां पतिः प्रजापतिः । (अ० क०, पृ० 265)

प्रज्ञा

वैमल्यगतमहामुद्रा प्रज्ञा । (अ० क०, पृ० 319)

प्रज्ञोपायः

प्रज्ञा सर्वधर्माविकल्परूपा शून्यता । उक्तं चादिबुद्धे—

[2]त्यक्त्वेमां कर्ममुद्रां सकलुषहृदयां कल्पितां ज्ञानमुद्रां
सम्यक्सम्बोधिहेतोर्जिनवरजननीं भावयेद् दिव्यमुद्राम् ।
निर्लेपां निर्विकारां खसमहततमां व्यापिनीं योगगम्यां
कूटस्थां ज्ञानतेजां भवकलुषहरामादिबुद्धानुविद्धाम् ॥

इति सैव उपायः । (अ० क०, पृ० 186)

प्रत्यात्मवेद्यः

षष्ठो वज्रधरः कुमारीसुरतसुखवदनन्यवेद्यत्वात् प्रत्यात्मवेद्यः । उक्तं च—

वक्तुं न शक्यते सौख्यं कुमार्याः सुरतं विना ।
यौवने सुरतं प्राप्य स्वतो वेत्ति महासुखम् ॥
एवं न शक्यते वक्तुं समाधिरहितं सुखम् ।
समाधावक्षरं प्राप्ताः स्वतो विन्दन्ति योगिनः ॥ (अ० क०, पृ० 246)

---

1. का० त०, 3.166.
2. का० त० 4.199.

प्रत्याहारः

प्रत्याहारशब्देन त्रैधातुकबुद्धबिम्बदर्शनम् । कुण्डल्या सह योगतः । अत्रामृतकुण्डलीसंज्ञया सन्ध्याभाषान्ते वा स्वरित्युक्तो भगवता । (डा० जा० सं० र०, पृ० 5)

प्रमथः

महासुखशुक्रदान्तवशीकृतप्रादेशिकक्षणा(स्कन्धा)दिविघ्नगणत्वेन विघ्नाधिपत्वात् प्रमथः ।

(अ० क०, पृ० 319)

प्रमथेश्वरः

कायवाक्चित्तमुक्तिरूपत्र्यम्बकस्वभावत्वात् प्रमथेश्वरः । (अ० क०, पृ० 319)

प्रह्वकायः

प्रह्वकायः सहजनिमग्नकायवाक्चित्तः । (अ० क०, पृ० 192)

प्राणायामः

प्राणायामो नाम ललनावामदक्षिणमार्गनिरोधः । अयमेव वसन्तकालः । अवधूतीमध्यमाङ्गे प्राणवायोः समप्रवृत्तिरिति । तत्रानिलयोगेनावधूत्यां संचार इति । तस्य ॐकारेण उच्चा-(च्छ्वा)सः, आःकारेण निःश्वासः । ॐ हूँकारेण निरोधश्चन्द्ररविराहुस्वभावेन कुरुते योगी । इति प्राणायामाङ्गमुच्यते । (डा० जा० सं० र०, पृ० 6)

प्रीतिः

प्रीतिर्नाम सर्वभावेषु चित्तारोपणम् । (डा० जा० सं० र०, पृ० 6)

[इसके आगे का अंश 'धीः'. के अगले अंक में देखें]

———

चार बौद्ध कुलों की समयमुद्राएँ

—जनार्दन पाण्डेय—

['धीः' के अङ्क 1, 3, 4, 7, 9, में विविध मुद्राओं के लक्षण भिन्न-भिन्न ग्रन्थों से दिये गये हैं। प्रथम अङ्क में बताया गया है कि प्रत्येक देवता की भिन्न-भिन्न आराधनाओं में समयमुद्राएँ भी भिन्न-भिन्न होती हैं। इस अङ्क में बौद्धों के चार प्रसिद्ध कुलों—तथागतकुल, वज्रसत्त्वकुल, पद्मकुल और मणिकुल की समयमुद्राओं के लक्षण सर्वतथागततत्त्वसंग्रह से दिये जा रहे हैं।]

तथागतकुल की समयमुद्राएँ

रत्नवज्रा

रत्नवज्रा समाङ्गुष्ठतर्जनीमुखसन्धनात्।
सा एव मध्यमानामकनिष्ठा सुप्रसारिता॥

पताका

पताका तु समानामकनिष्ठाभ्यां समन्विता।
हासस्थानस्थिता चैव सा एव परिवर्तिता॥

वज्रकोशा

प्रसारितसमाङ्गुष्ठस्थिता कुञ्चिततर्जनी।
सा एव वज्रकोशा तु मध्यमा मुखसन्धिता॥

चक्रा

सा एव तु समानामकनिष्ठा चक्रसंज्ञिता।
निर्युक्ताङ्गुष्ठबन्धा तु प्रसारितमुखोत्थिता॥

वज्रमुष्टि

वज्रबन्धस्त्वधोदानात् स्वाञ्जलिश्चोर्ध्वदायिका।
समाङ्गुष्ठनिपीडा च सुप्रसारितलेपना॥
एकतर्जनिसंकोचा द्वयङ्गुष्ठग्रन्थिबन्धिता।
अङ्गुष्ठाग्रद्यकटा बन्धा वज्रमुष्ट्यग्रसन्धिता॥

—सर्वतथागततत्त्वसंग्रह, पृ० 28

वज्रसत्त्वकुल की समयमुद्राएँ

सत्त्वोष्णीषा

वज्रबन्धं दृढीकृत्य प्रविष्टाङ्गुष्ठसंचयम् ।
कुञ्चिताग्र्यासु गच्छन्तं सत्त्वोष्णीषेति संज्ञिता ॥

तेजोराशि

वज्रबन्धं समादाय समाङ्गुष्ठात्ममध्यमा ।
तेजोराशीति विख्याता तेजोराशेर्महात्मनः ।'

महाविद्योत्तमा

वज्रमुद्राद्विकं बद्ध्वा कनिष्ठाङ्गुष्ठसन्धितम् ।
गाढमङ्कुशबन्धेन महाविद्योत्तमस्य तु ॥

हृदया

महाविद्योत्तमामयीं मुद्रां बद्ध्वा सुयन्त्रिताम् ।
हृदयाङ्गुष्ठमुखानां तु बन्धनाद् हृदया स्मृता ।

चतुःपुष्पा

तामेवानाममध्याभिरङ्गुलीभिः सुयन्त्रिताम् ।
वज्ररत्नप्रयोगेण परिवर्त्य मुखस्थिताम् ॥
तामेवोत्तानसंस्थां स्वहृदये परिवर्त्यं वै ।
चतुःपुष्पा तु नामेन पद्मविद्योत्तमस्य तु ॥

वज्रकर्मप्रसाधिका

तामेव मूर्धादारभ्य भ्रमत्कायाग्रमण्डला ।
वज्रविश्वस्य मुद्रेयं वज्रकर्मप्रसाधिका ॥

सर्वसाधिका

सत्त्ववज्रां दृढीकृत्य कनिष्ठा वज्रसन्धिता ।
सर्वविद्धृदयस्यास्य मुद्रेयं सर्वसाधिका ॥

वज्रशूला

कनिष्ठाङ्गुष्ठबन्धे तु वाममध्याङ्गुलित्रिके ।
त्रिशूले मध्यशूलं तु वज्रमुद्रापरिग्रहम् ॥
वज्रविद्योत्तमस्येयं वज्रशूलेति कीर्तिता ।

—सर्वतथागततत्त्वसंग्रह, पृ० 94

पद्मकुल की समयमुद्राएँ

विश्वपद्मा

वज्राञ्जलिं समाधाय सममध्योत्थिता तथा ।
कनिष्ठाङ्गुष्ठविकचा विश्वपद्मेति कीर्तिता ॥

जटाबुद्धा

सा एवाङ्गुष्ठपर्यङ्का कुञ्चिताग्राग्रयविग्रहा ।
मध्यवज्रजटामूर्ध्नि जटाबुद्धेति कीर्तिता ॥

अमोघमुद्रा

वज्रबन्धं दृढीकृत्य समाङ्गुष्ठमधस्तनम् ।
तर्जनीद्वयसंकोचा समुद्गता समाधितः ॥
समाञ्जलिं समाधाय तर्जनी वज्रपीडिता ।
विकसिताङ्गुष्ठमुखयोर्मुद्राऽमोघेश्वरस्य तु ॥

पद्मबुद्धा

वज्रबन्धं दृढीकृत्य समुत्तानं तु बन्धयेत् ।
समाङ्गुष्ठकृता पद्मे पद्मबुद्धेति कीर्तिता ॥

साधुपद्मा

अङ्गुष्ठवज्राग्राभ्यामङ्कुशं खड्गमेव च ।
अन्त्यद्वयविकासा च मध्यानामाग्रकुड्मला ॥
समाञ्जलिं समाधाय वलिताङ्गुष्ठकुञ्चिता ।
तर्जन्या तर्जनीं गृह्याकर्षयेत् पद्मबाणया ॥
समाञ्जलिं तथोत्तानां बन्धयेत् साधुमुद्रया ।
साधुकारं प्रददाति साधुपद्मेति कीर्तिता ॥

पद्मभृकुटि

समाञ्जलिं दृढीकृत्य कुञ्चिताग्रया मुखस्थिता ।
कनिष्ठाभ्यां तु विकचा पद्मभृकुटिरुच्यते ॥

पद्मसूर्या

वज्रबन्धं दृढीकृत्य हृदये तु प्रसारयेत् ।
पद्मसूर्येति विख्याता सर्वाङ्गुलिसुमण्डला ॥

पद्मरत्नध्वजाग्री

समाञ्जलिं दृढीकृत्य तर्जनीभ्यां मणीकृता।
पद्मरत्नध्वजाग्री तु मूर्ध्नि बाहुप्रसारिता॥

पद्ममुष्टि

वज्रमुष्टिं द्विधाकृत्य कुञ्चयित्वा तु मध्यमे।
स्वाङ्गुष्ठपृष्ठनिहिते पद्ममुष्टिरुदाहृता॥

हयग्रीवा

वज्रधातुप्रयोगेण वज्राञ्जलिसमुत्थिता।
सर्वपूजाग्रयदेवीनां समयाग्र्यस्तु बन्धयेत्॥
वज्रबन्धं दृढीकृत्य सन्धयेत् तर्जनीद्वयम्।
संकोचात् पुरतः सन्धेद् हयग्रीवेति कीर्तिता॥

अमोघपाशा

पद्माञ्जलिं समाधाय तर्जनीग्रन्थिबन्धना।
अमोघपाशमुद्रेयं तर्जन्यङ्गुष्ठसङ्कुला॥

—सर्वतथागततत्त्वसंग्रह, पृ० 116,117

(पद्मकुल की गुह्यमहामुद्राओं के लिये उक्त ग्रन्थ के पृष्ठ 122-124 भी देखें)

मणिकुल की समयमुद्राएँ

सर्वार्थसिद्धिदा

वज्रबन्धं दृढीकृत्य तर्जनीभ्यां मणीकृता।
प्रसारिताङ्गुष्ठमुखा हृदि सर्वार्थसिद्धिदा॥

मणिरत्नप्रदा

वज्रबन्धं समाधाय मध्यमा मणियोजिता।
मुद्रेयं मणिचिह्नस्य मणिरत्नप्रदायिका॥

मणिरत्नाङ्कुशी

सा एवाङ्कुशयोगेन तर्जनीभ्यां समिन्धिता।
सर्वार्थकर्षणी मुद्रा मणिरत्नाङ्कुशी स्मृता॥

बाणाकर्षणी

सा एव वलितां कृत्वा तर्जन्या तर्जनीग्रहा।
बाणाकर्षणयोगेन कर्षयन् रागयेज्जगत्॥

साधुकारा

सा एव साधुकारा तु तर्जन्यङ्गुष्ठयोजिता।
सा एवाङ्गुष्ठसन्धानसंच्छन्नाग्रयाङ्गुली तथा॥

मणिवृष्टिः

अङ्गुष्ठान्तरयोश्चैव पुनरग्रधा मुखे क्षणात्।
मणिदृष्टिस्तु सा ख्याता दृष्टयर्थानां प्रहारिका॥

मणिकोशा

मणिकोशा हरेदर्थान् जगतां विक्रमेण तु।
वज्रबन्धाग्रचक्रा च समाङ्गुष्ठप्रवेशिता॥

मणिबन्धा

मणिबन्धेति विख्याता रक्षाकवचिनी स्मृता।
सा एव सर्वसिद्धयर्था यक्षयोगा मुखस्थिता॥

मणिदंष्ट्रा

मणिदंष्ट्रेति विख्याता भयात् सर्वार्थहारिणी।
वज्रबन्धं दृढीकृत्य कुञ्चिताग्रया सुयन्त्रिता॥

मणिमुष्टिः

संगृह्याङ्गुष्ठयोः सम्यग् मणिमुष्टिस्तु सिद्धिता।
पूजाग्रसमयानां तु वज्रधातुप्रयोगतः॥

—सर्वतथागततत्त्वसंग्रह, पृ० 145-147

इन मुद्राओं में कामनाभेद से कुछ हेरफेर भी होते हैं, उन्हें उक्त ग्रन्थ में ही देखें।

———

सर्वतथागततत्त्वसंग्रह : श्लोकार्धानुक्रमणी

—ठिनलेराम शाशनी—

['धीः' के पिछले अंकों में अनुसन्धाताओं की सुविधा के लिये सेकोद्देशटीका, अद्वयवज्रसंग्रह, साधनमाला, कालचक्र आदि ग्रन्थों के परिशिष्टों का प्रकाशन किया गया था। अब इस अंक में सर्वतथागततत्त्वसंग्रह की श्लोकार्धानुक्रमणी दी जा रही है।

सर्वतथागततत्त्वसंग्रह का सम्पादन विस्तृत भूमिका सहित डा० लोकेशचन्द्र ने किया है तथा मोतीलाल बनारसीदास द्वारा सन् 1987 में प्रकाशित हुआ है। इस ग्रन्थ का अनुवाद चीनी तथा तिब्बती भाषाओं में हुआ है। बौद्ध तन्त्रों के चार विभागों में यह योगतन्त्र के अन्तर्गत है। यह योगतन्त्र का मूल ग्रन्थ है। इस ग्रन्थ के चार भाग हैं। प्रत्येक भाग को आश्रय करके आचार्यों ने टीका ग्रन्थों की रचना की है। इससे ऐसा जान पड़ता है कि प्रत्येक भाग अपने में पूर्ण है। आचार्य पद्मवज्र द्वारा रचित "तन्त्रार्थावतारव्याख्यान" (तो० 2502) नामक टीका ग्रन्थ में उन्होंने तत्त्वसंग्रह में वर्णित 37 तत्त्वों के नाम गिनाये हैं। इससे तत्त्वसंग्रह नाम की सार्थकता प्रतीत होती है।]

श्लोकार्धानुक्रमणी

—o—

दुर्लभ ग्रन्थों की आधार सामग्री

—डॉ० ठाकुरसेन नेगी—

[इस शीर्षक के अन्तर्गत 'धीः' के प्रथम आठ अंकों में लगभग 271 महत्त्वपूर्ण हस्तलिखित तन्त्र-ग्रन्थों की आधार सामग्री की सूचना दी जा चुकी थी, जो अब दुर्लभ ग्रन्थों की आधार सामग्री (प्रथम भाग) शीर्षक से ग्रन्थ रूप में प्रकाशित हो चुकी है। 'धीः' के नवें अंक में इस शीर्षक से ही अन्य 85 महत्त्वपूर्ण हस्तलिखित ग्रन्थों की आधार सामग्री की सूचना दी गई थी। संप्रति एशिया, यूरोप एवं अमेरिका के विभिन्न सुदूरवर्ती पुस्तक संग्रहों में संरक्षित लगभग 320 अन्य महत्त्वपूर्ण हस्तलिखित बौद्ध स्तोत्र-ग्रन्थों की आधार सामग्री प्रस्तुत है, जो 2-3 अंकों में पूरी होगी।]

Title	Author	Institution	Ms. No.
अचिन्त्यस्तव सटीक Acintyastava Saṭika No. 1128 (ka. 76b⁷-79a²) Bsam-gyis-mi-khyag-par-bstod-pa A. klu-Sgrub T. Tilaka, Pa-tshab ñi-ma-grags.	नागार्जुन Nāgārjuna	BAK SMTUL	Reel No. E 370/21 340-I-C
अम्बुधारास्तव Ambudhārāstava		BAK	4/1033
अरुणवरुणस्तोत्र Aruṇavaruṇastotra		MCBMBLJ	CH 122-G
अष्टमङ्गलगाथास्तोत्र Aṣṭamaṅgala Gāthā Stotra		,, ,,	CH 214-B DH 207
अष्टमङ्गलस्तव Aṣṭamaṅgalastava		BAK ,,	1/1696 4/2089
अष्टमङ्गलस्तवस्तोत्र Aṣṭamaṅgalastava Stotra		MCBMBLJ	CH 199
अष्टमहास्थानचैत्यवन्दनास्तोत्र Aṣṭamahāsthānacaityavandanāstotra No. 1168 [ka. 240b⁶-241a⁵] Gnas Chen-Po brgyad-kyi mchod- rten-la Phyag-ḥtshal-bahi-bstod-pa. Taisho No. 1684, Nj, No. 1071. A. Śriharṣadeva. T. Śri Jñānamitra, Yon-tan dpal.		IASWR NEPAL-II	MBB-II-135 P. 237

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	15	Comp.	
Paper		(17a4-33a2)		with the Akāri-ṭikā
NP	N	9-10		M. Film CIHTS
,,	,,	34		
,,	,,	Folding Book		
,,	,,	,,		
,,	,,	,,	Comp.	
,,	,,	3 (37-39)		M. Film CIHTS
,,	,,	4 (1b-4a)		
,,	,,	23	,,	M. Fische CIHTS
,,	,,	13		

Title	Author	Institution	Ms. No.
अष्टमहाविद्यास्तोत्र Aṣṭamahāvidyāstotra		RAK	1/1697 $\frac{2}{14}$
अष्टमातृकास्तुति Aṣṭamātṛkāstuti		,,	4/346
अष्टमातृकास्तोत्र Aṣṭamātṛkāstotra		,,	Reel No. H 381/11
		,,	3/360
		,,	,,
		,,	3/589
अष्टमातृकानवग्रहगणेशमहाकालमहाभैरवीस्तोत्र Aṣṭamātṛkānavagrahagaṇeśamahākālamahābhairavīstotra		SMTUL	386-11
अष्टलोकपालस्तोत्र Aṣṭalokapālastotra		RAK	3/360
		,,	3/589
अष्टविधिसत्वनामस्तोत्र Aṣṭavidhisattvanāmastotra		,,	Reel No. E 126/5
अष्टश्मशानस्तोत्र Aṣṭaśmaśānastotra		,,	,, ,, E 365/8

Material	Script	Folio	Comp./Incomp.	Other Information
PL	Guptākṣara	1	Comp.	
NP	N	66	,,	
,,	Dev.	—	Incomp.	
,,	,,	(136a-136b)	Comp.	M. Film CIHTS
,,	,,	(143b-144a)	,,	,, ,,
,,		257-258	,,	,, ,,
IP	,,	($35a^1$-$40b^1$)		
NP	,,	142b-143a		M. Film CIHTS
,,	N	257a-257b		,, ,,
,,	,,	4	Comp.	
,,	Dev.	3	,,	

Title	Author	Institution	Ms. No.
अष्टसाहस्रिकाप्रज्ञापारमिता एकविंशतिस्तोत्र Aṣṭasāhasrikāprajñāpāramitā Ekaviṁśatistotra		MCBMBLJ	A 180
आदिद्वादशकस्तोत्र Ādidvādaśakastotra		BAK	3/360
आर्यतारा अष्टोत्तरशतनामस्तोत्र Āryatārā Aṣṭottaraśatanāmastotra		,,	Reel No. H 37/8
		,,	4/1616
आर्यतारा एकविंशतिस्तोत्र Āryatārā Ekaviṁśatistotra		,,	5/128
		,,	5/128
		,,	5/128
		,,	5/128
		,,	Reel No. E 193/16
		MCBMBLJ	CH 204
		,,	CH 495-A
		,,	KA 16-S
		,,	DH 136
आर्यतारा नमस्कारैकविंशतिस्तोत्र Āryatārānamaskāraikaviṁśatistotra		BAK	5/131
		MCBMBLJ	CA 11-8
		,,	CH 136
		,,	CH 295
		,,	CA 74-12

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	3 (1b-3b)		
,,	,,	2(10b-11b)		M. Film CIHTS
,,	,,	16	Comp.	
,,	Rañjanā	6	,,	
,,	N	Folding Book	,,	
,,	,,	24	,,	
,,	,,	37	,,	
,,	,,	Folding Book	,,	
,,	,,	9	,,	
,,	,,	27		
,,	,,	17		
,,	,,	7 (21b-27b)		
,,	,,	5 (9a-13b)		
,,	,,	9	Comp.	
,,	,,	3 (1b-3b)	,,	NS 906
,,	,,	3 (1b-3b)	,,	
,,	,,	4 (1a-5a)	Incomp.	Missing F. 2.
,,	,,	4 (1b-4b)		

Title	Author	Institution	Ms. No.
आर्यतारास्तोत्र		BAK	3/360
Āryatārāstotra		,,	3/360
No. 1693 (Śa. 49b[6]-51a[b])		,,	5/118
Ḥphags-ma sgrol-ma-la bstod-pa		,,	Reel No. E 377/11
A. Ñima-sbas-pa.		,,	,, E 127/29
आर्यतारा बौद्धस्तोत्राणि		,,	5
Āryatārā Bauddha Stotrāṇi			
आर्यपद्मपाणिलोकेश्वर स्तोत्र		,,	3/589
Āryapadmapāṇilokeśvarastotra			
आर्यस्तव			
Āryastava		,,	Reel No. I. 45/1[a]
आर्यावलोकितेश्वर-अनन्तनागराजस्तवस्तोत्र		MCBMBLJ	CH 130
Āryāvalokiteśvara Anantanāgarāja-		,,	CH 214-0
stavastotra		,,	CH 404
		SMTUL	164-13
		,,	258-12
		,,	276-16
		CAMBRIDGE	1332
आर्यावलोकितेश्वरकरुणास्तवस्तोत्र	वन्धवाचार्य	SMTUL	164-4
Āryāvalokiteśvarakaruṇāstava-	Vandhavācārya	,,	276-24
stotra		CAMBRIDGE	1333
		,,	1379
		MCBMBLJ	CH 20
		,,	CH 26-B
		,,	CH 100-A
		,,	CH 229
		BAK	4/1033
		,,	4/2089

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	42b		M. Film CIHTS
,,	,,	(42b-43a)		,, ,,
,,	N	6	Comp.	
,,	Dev.	20	,,	
,,	N	10	,,	
,,	,,	24	Comp.	
,,	,,	(255a)		M. Film CIHTS
,,	Dev.	4	Incomp.	
,,	N	40		
,,	,,	Folding Book		NS. 962
,,	,,	30		
Paper	,,	(19, 9-17)		
,,	,,	(48, 3-50, 3)		
,,	,,	(29, 5-31, 2)		
,,		Folding Book		
Paper	,,	(7, 10-9, 16)		
,,	,,	(78, 4-85, 1)		
,,	,,	(48a-48b)		A. D. 1797
,,		(25 stanzas) ending		
NP	,,	28	Incomp.	With Newāri tran.
,,	,,	Folding Book		NS. 823
,,	,,	34(1a-34b)		
,,	,,	82		
,,	,,	3 (31-33)		M. Film CIHTS
,,	,,	5 (92-96)		,, ,,

Title	Author	Institution	Ms. No.
आर्यावलोकितेश्वर-त्रिगुणात्मकस्तोत्र Āryāvalokiteśvaratriguṇātmaka-stotra.	जयप्रतापमल्ल Jayapratāpa-malla	MCBMBLJ	CH 214-J
		,,	DH 224
		BAK	4/1033
आर्यावलोकितेश्वरमणिकमालास्तोत्र Āryāvalokiteśvaramaṇikamālā-stotra		,,	4/1033
		,,	,,
आर्यावलोकितेश्वर रक्षकस्तव Āryāvalokiteśvararakṣakastava		MCBMBLJ	CH 226-B
		,,	
आर्यावलोकितेश्वररञ्जकास्तव Āryāvalokiteśvararañjakāstava		SMTUL	164-18
आर्यावलोकितेश्वररत्नमालास्तवस्तोत्र Āryāvalokiteśvararatnamālāstava stotra		MCBMBLJ	CH 183-C
		,,	CH 406
		SMTUL	164-3
		,,	276-41
		BAK	4/1033
		,,	4/2089
आर्यावलोकितेश्वररूपस्तवस्तोत्र Āryāvalokiteśvararūpastavastotra		MCBMBLJ	CH 100-B
		SMTUL	164-5
		,,	276-23
		CAMBRIDGE	1322
		,,	1614
		BAK	4/2089

Material	Script	Folio	Comp./Incomp.	Other Information
NP	N	Folding Book		NS 962
,,	,,	98		
,,	,,	4 (44-47)		M. Film CIHTS
,,	,,	(12-14)		,, ,,
,,	,,	(55-57)		,, ,,
,,	,,	(69)		42 other stotras,
,,	,,	Folding Book		
Paper	,,	(22, 15-23, 15)		
NP	,,	Folding Book		
,,	,,	12		
,,	,,	(5, 4-7, 10)		
,,	,,	(129, 2-135, 5)		
,,	,,	4 (35-38)	Incomp.	M. Film CIHTS
,,	,,	5 (118-122)		,, ,,
,,	,,	34		With Newari translation. NS. 946
Paper	,,	(9, 16-11, 14)		
,,	,,	(73, 3-78, 4)		
,,		Folding Book		
,,		(6b)		
NP	,,	4 (89-92)		M. Film CIHTS

Title	Author	Institution	Ms. No.
आर्यावलोकितेश्वरवन्दनास्तव Āryāvalokiteśvaravandanāstava		SMTUL RAK	164-16 4/1033
आर्यावलोकितेश्वरवन्दनास्तोत्र Āryāvalokiteśvaravandanāstotra		MCBMBLJ RAK	CH 214-Q 4/2089
आर्यावलोकितेश्वरवेदनास्तोत्र Āryāvalokiteśvaravedanāstotra		MCBMBLJ	CH 214-L
आर्यावलोकितेश्वरसप्ताक्षरस्तोत्र Āryāvalokiteśvarasaptākṣarastotra		SMTUL	164-29
आर्यावलोकितेश्वरस्तवराज Āryāvalokiteśvarastavarāja		,, ,, RAK RAS	164-12 276-38 4/2089 30-III
आर्यावलोकितेश्वरस्तव Āryāvalokiteśvarastava		RAK ,, ,,	5/127 Reel No. E 374/15 4/1033
आर्यावलोकितेश्वरस्तवस्तोत्र Āryāvalokiteśvarastavastotra		SMTUL	276-4

Material	Script	Folio	Comp./Incomp.	Other Information
NP	N	(21, 4-22, 7)		
		2 (17-18)		M. Film CIHTS
,,	,,	Folding Book		NS 962
,,	,,	2 (123-124)		M. Film CIHTS
,,	,,	Folding Book		NS 962
Paper	,,	(44, 4-15)		
,,	,,	(17, 19-19, 9)		
,,	,,	(115, 5-119, 5)		
NP	,,	2 (111-112)		M. Film CIHTS
,,	,,	Folding Book	Comp.	
,,	Dev.	6	,,	
,,	N	2 (21-22)		M. Film, CIHTS
,,	,,	(9, 2-11, 2)		

Title	Author	Institution	MS. No.
आर्यविलोकितेश्वरस्तोत्र		BAK	1/1696
Āryāvalokiteśvarastotra		,,	1/1696
		,,	Reel No. E 487/27
		,,	,, ,, E 259/21
		,,	,, ,, E 14/9
		,,	4/1616
		,,	3/360
	यमराज	,,	,,
	Yamarāja		
	वलिराज	,,	,,
	Valirājā		
	महेश्वर	,,	,,
	Maheśvara		
	उमादेवी	,,	,,
	Umādevi	,,	4/1033
	वासुकिनाग	,,	4/2089
	Vāsukināga	,,	,,
	अनन्तनाग		
	Anantanāga	MCBMBLJ	CH 2
		,	CH 69
		,,	CH 122-J
		,,	CH 221
Peking Ed. No. 3546	चरपतिपाद	SMTUL	164-2
No 2726 (Nu. $93b^{5}$-95 a^{2})	Carapatipāda		276-22
Ḥphags-pa spyan-ras-gzigs	,,	CAMBRIDGE	1332
dbaṅ-phyug-la tsarpa-ṭis	,,	,,	1614
bstod-pa.	,,	MCBMBLJ	CH 183-B
T. Śrīvanaratna, Chos-ḥkhor-	,,	,,	CH 18-B
lo-tsā-ba.	,,	,,	CH 26-C
R. Rgya-mtsho,	,,	,,	CH 266-B
	,,	,,	CH 236
	,,	,,	CH 100-C
	,,	BAK	4/2089

Material	Script	Folio	Comp./Incomp.	Other Information
NP	N	Folding Book		
,,	,,	,,		
,,	,,	6	Comp.	
,,	,,	7	,,	
,,	,,	8	,,	
PL	Rañjanā	6	,,	
NP	Dev.	(22b-23a)		M. Film CIHTS
,,	,,	(77a-78a)		,, ,,
,,	,,	(78a-78b)		,, ,,
,,	,,	1 (78b)		,, ,,
,,	,,	1 (79a)		,, ,,
,,	N	4 (47-50)		,, ,,
,,	,,	2 (51-52)		,, ,,
,,	,,	(62a)		,, ,,
,,	,,	22		
,,	,,	98		
,,	,,	Folding Book		
,,	,,	60		
,,	,,	(3, 6-5, 4)		
,,	,,	([8]-73, 3)		
Paper		Folding Book		
,,	,,	(1-3a)		
NP	,,	Folding Book		
,,	,,	,, 49		
,,	,,	,, 44		
,,	,,	,, 16		
,,	,,	,, 20		
,,	,,	,,		
,,	,,	4 (86-89)		

Title	Author	Institution	Ms. No.
आर्यावलोकितेश्वरस्तोत्र	चन्द्रकान्तभिक्षुणी	MCBMBLJ	183-D
Ārayāvalokiteśvarastotra	Candrakānta Bhikṣuṇi	SMTUL	164-14
	,,	,,	276-30
	,,	BAK	4/1033
	वासुकिनागराज Vāsukināgarāja	SMTUL	276-20
	,,	MCBMBLJ	CH 195-B
	श्रीवीरकुश Śrī Vīrakuśa	,,	KA 16-R
आर्यावलोकितेश्वरस्वरूपस्तोत्र Āryāvalokiteśvarasvarūpastotra		BAK	4/1033
उग्रतारास्तोत्रशतक Ugratārāstotraśataka		,,	1/120

Material	Script	Folio	Comp./Incomp.	Other Information
NP	N	Folding Book		
Paper	,,	(19, 17-20, 15)		
,,	,,	(95, 1-97, 1)		
NP	,,	2 (5-6)		M. Film CIHTS
Paper	,,	(43, 5-45, 3)		
NP	,,	Folding Book		
,,	,,	11 (1b-11b)		
,,	,,	(15a)		M. Film CIHTS
,,	,,	8		

Title	Author	Institution	Ms. No.
उग्रतारास्तोत्र Ugratārāstotra		SMTUL	418-70
		,,	420-V-5
		,,	201-40
		BAK	3/360
उग्रतारास्नानस्तोत्र Ugratārāsnānastotra		,,	1/129
उग्रवाराहीस्तव Ugravārāhīstava		,,	5/2001
उमामहेशकृतस्तव Umāmaheśakṛtastava		SMTUL	202-88
		,,	418-36-a
एकजटिभट्टारिकानामस्तोत्र Ekajaṭi Bhaṭṭārikānāmastotra		CAMBRIDGE	1547
		SMTUL	258-9
		MCBMBLJ	CH 188
		,,	CH 122-k
		BAK	5/1696
एकजटिस्तोत्र Ekajaṭistotra		JBORS	XXXVI-163
		SMTUL	420-IX-3
		BAK	4/1033
		,,	1/799
		MCBMBLJ	CH 122-K

Material	Script	Folio	Comp./Incomp.	Other Information
Paper	N	$(144a^{3}\text{-}145a^{1})$		
,,	,,	$(9a^{1}\text{-}10a^{1})$		
,,	,,	$(153a^{6}\text{-}154a^{2})$		
NP	Dev.	(152b-154b)		M. Film CIHTS
,,	,,	Folding Book		
,,	,,	6		
Paper		$(403b^{4}\text{-}404a^{2})$		
,,		$(86b^{5}\text{-}87a^{4})$		
,,		18		XVIIIth Cent.
,,		(41, 1-44, 4)		
NP	N	3(1b-3b)		
,,	,,	Folding Book		
,,	,,	,,		
Paper	Dev.	6	Comp.	
NP	N	$(3b^{1}\text{-}5b^{2})$		
,,	,,	12	,,	M. Film CIHTS
,,	,,	18	,,	
,,	,,	Folding Book		

Title	Author	Institution	MS. No.
एकजटाध्यानस्तोत्र Ekajaṭādhyānastotra		RAK	3/360
कथास्तोत्र Kathā Stotra		,,	Reel No. H. 19/12
कमलाकरसर्वतथागतस्तवस्तोत्र Kamalākarasarvatathāgata- stavastotra		,, SMTUL ,,	3/360 202-99 418-83
कमलाकरसर्वतथागतस्तुति Kamalākarasarvatathāgatastuti		RAK	3/589
करवीरचण्डमहारोषणस्तोत्र Karaviracaṇḍamahāroṣaṇastotra		MCBMBLJ	DH 20
करुणामयस्तोत्र Karuṇāmayastotra		RAK ,,	1/1696 3/360
कल्पान्तिकस्तोत्र Kalpāntikastotra		,,	4/2089

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	(151b-152b)		M. Film CIHTS
,,	N	6	Comp.	
,,	Dev.	(147b-150a)		M. Film CIHTS
Paper	N	($411b^{1}$-$413b^{6}$)		
,,	,,	($158b^{5}$-$161a^{4}$)		
NP	,,	(269-271)		M. Film CIHTS
,,	,,	4 (1b-4a)		
,,	,,	Folding Book		
,,	Dev.	133a		M. Film CIHTS
,,	N	129a	Incomp.	

Title	Author	Institution	Ms. No.
कल्याणत्रिंशिकास्तोत्र Kalyāṇatriṁśikāstotra		BAK	3/360
कल्याणपञ्चविंशतिस्तोत्र Kalyāṇapañcaviṁśatistotra		,,	3/360
काकपरीक्षा, श्वानपरीक्षा आदौ कर्मप्रशंसा दिव्यस्तोत्र Kākaparīkṣā, Śvānaparīkṣā ādaukarmapraśaṁsā divyastotra		MCBMBLJ	CH 521
कायूत्तरस्तोत्र Kāyūttarastotra		BAK	4/2089
कालिकास्तव Kālikāstava		SMTUL	418-139
कालीस्तोत्र Kālīstotra		MCBMBLJ	KA 16-C
कुलिशेश्वरस्तोत्र (वज्रडाकार्णवतन्त्र) Kuliśeśvarastotra (Vajraḍākārṇavatantra)		BAK MCBMBLJ	4/918 A 162

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	(32a-33a)		M. Film CIHTS
,,	,,	(49b-52b)		,, ,,
,,	N	42		
,,		(49b)		
Paper		(248b4-249b5)		
NP		3 (1b-3a)		
,,	,,	21	Comp.	
,,	,,	11	Incomp.	(F. 1, 7, 8, 11, 13-18 & 21 only)

Title	Author	Institution	Ms. No.
कोलमुखीयमहातन्त्रोक्त वज्रवाराहीद्वादशनामस्तोत्र चिन्तार्थदंश (योगसिद्धान्ततन्त्र) Kolamukhiyamahātantrokta Vajravārāhidvādaśanāma stotra Cintārthadaṁśa (Yogasiddhāntatantra)		MCBMBLJ	A 91-1
गणपतिस्तोत्र Gaṇapatistotra		BAK	4/2089
		SMTUL	199-16
		CAMBRIDGE	1679-II
गणपतिहृदयस्तोत्र Gaṇapatihṛdayastotra		BAK	Reel No E 356/18
गण्डीस्तव Gaṇḍistava		,,	3/589
गणेशस्तोत्र Gaṇeśastotra		,,	3/360
		MCBMBLJ	KA 16-M
गीतस्तोत्रादिसंग्रह Gītastotrādisaṁgraha		BAK	3/659

Material	Script	Folio	Comp./Incomp.	Other Information
NP	N	10 (1b-10b)	Comp.	
,,	,,	1 (32a-b)		M. Film CIHTS
Paper	,,	($134a^1$-$135a^2$)		
,,		20		XV-XVIth Cent.
NP	Dev.	5	Comp.	
,,	N	332-334		M. Film CIHTS
,,	Dev.	(49b-52a)		,, ,,
,,	N	5 (1a-5a)		
,,	Dev.	65		

Title	Author	Institution	Ms. No.
गुरुरत्नत्रयस्तोत्र Gururatnatrayastotra		RAK	3/360
गुह्येश्वरीस्तोत्र Guhyeśvarīstotra	मञ्जुश्री Mañjuśrī	,, MCBMBLJ ,,	3/360 CH 469 KA 16 Q
चक्रसंवरदेवहेरुकस्तुति Cakrasaṁvaradevaherukastuti.		MCBMBLJ	CA 25-3
चक्रसंवरविशुद्धिस्तोत्र Cakrasaṁvaraviśuddhistotra		RAK MCBMBLJ	Reel No.E.698/13 KA 16-W
चण्डमहारोषणस्तोत्र Caṇḍamahāroṣaṇastotra		RAK	Reel No. E. 699/1
चण्डमहारोषणक्रमोदयस्तोत्र Caṇḍamahāroṣaṇakramodayastotra		,, SMTUL	Reel No. E.274/3 420-VI-2
चतुर्भुजमहाकालस्तोत्र Caturbhujamahākālastotra		RAK	3/360

Material	Script	Folio	Comp./Incomp.	Other Information
NP	Dev.	(4a)		M. Film CIHTS
,,	,,	(28b-29a)		,, ,,
,,	,,	Folding Book, 10		
,,	N	22 (1b-22a)		
,,	,,	12 (25-36b)		Missing F. 1-24.
,,	,,	3		
,,	,,	3 (1b-3a)		
,,	,,	8	Comp.	
,,	,,	1	,,	
Paper		(6a⁴-6b end)	,,	
NP	Dev.	(147a)		M. Film CIHTS

Title	Author	Institution	Ms. No.
चतुःषष्टियोगिनीस्तवः Catuḥṣaṣṭiyoginīstava		BAK	3/589
चन्द्रद्वादशनामस्तव Candradvādaśanāmastava		SMTUL	418-92
चन्द्रिकास्तव Candrikāstava		MCBMBLJ	CH 201-A
चरणदर्शनाभिलाषस्तोत्र Caraṇadarśanābhilāṣastotra		CAMBRIDGE	1614
चरपटिस्तव Carapaṭistava		BAK	Reel No. H 382/4
चिन्तामणिस्तोत्रटीका Cintāmaṇistotraṭīkā	शाक्यबुद्धि Śākyabuddhi	,, ,, GOS	4/122 5/133 13277
